गीताञ्जलिः

(रवीन्द्रनाथस्य कवितानां तात्पर्यानुवादः)

अनुवादकः

श्रीफटिकलाल-दासः



फटिकलाल-दासः

जन्म
९ जुन १८९४

महाप्रयाणम्
२७ डिसेम्बर १९७४

गीताञ्जलिः

(रवीन्द्रनाथस्य कवितानां तात्पर्यानुवादः)

अनुवादकः

श्रीफटिकलाल-दासः

'कलेज दुग्प्लेक्स'-विद्यापीठस्य भूतपूर्वोऽध्यक्षः

चन्दननगरम्

प्रकाशक :—
देवदत्त दे,
चन्दननगरम्

[प्रकाशने 'विश्वभारत्या' अनुमतिर्लब्धा]

मुद्रक :—
श्रीसुशीलकुमार घोष
'सुशील प्रिण्टार्स'
२, ईश्वर मिल बाइ लेन
कलिकाता-७००००६

५०० पुस्तकानां प्रथमं प्रकाशनम्
जुलाइ, १९७५

मूल्यम्—१०)

संस्कृत पुस्तक भाण्डार
३८, विधान सरणिः, कलिकाता-६

प्रार्थना

आ चित्ततृप्तेर्बुधमण्डलीनां
साध्वीं न मन्ये कृतिमात्मकीयाम् ।
भवन्मतं वेदितुमत्र, विद्वन् !
तदुत्सुकं तिष्ठति मानसं मे ॥

—श्रीफटिकलाल-दासस्य

विज्ञप्तिः

यथात्र गङ्गासलिलेन लोकः
    करोति गङ्गार्चनमेकभक्त्या ।
रवीन्द्रनाथस्य तथा करोमि
    पद्यानुवादेन रवीन्द्रपूजाम् ॥ १ ॥

काकस्य कण्ठे पिककाकली किं
    ध्वनत्यटव्यां मधुवासरेऽपि ।
तथापि चेष्टा परिदृश्यते या
    सा नाम पङ्गोर्गिरिलङ्घनेच्छा ॥ २ ॥

यथान्तरिक्षेऽगणितानि भानि
    कवेः स्वकृत्ये कवितास्तथैव ।
कासाञ्चिदासां ग्रहणं विधाय
    गीर्वाणवाण्यां विहितोऽनुवादः ॥ ३ ॥

यथा द्विरेफाः क्षतजं विहाय
    भवन्ति पुष्पासवपानसक्ताः ।
उपेक्ष्य दोषान् विबुधास्तथा मे
    रसं कवेर्नः समदन्तु हृष्टाः ॥ ४ ॥

छात्रा गुणज्ञाः सुहृदोऽथवा ये
    जाताः सहायाः कृतिमुद्रणे मे ।
गृहेषु तेषां नियताचले स्तां
    सख्यं गते श्रीश्च सरस्वती च ॥ ५ ॥

—श्रीफटिकलाल-दासस्य

गीताञ्जलिः

(१)

शिरो नतं मे कुरु, देवदेव,
स्वपादपङ्केरुहपांशुनिम्ने ।
सर्वं च गर्वं भुवने मदीयं
निमज्जयाद्दणोः सलिलस्य मध्ये ॥ १ ॥

स्वस्मै प्रदातुं भुवि गौरवाणि
स्वमेव कुर्वे ह्यपमानभाजम् ।
प्रतिक्षणं स्वं परिवृत्य हन्त
स्वावर्तमध्ये विचरामि मोघम् ॥ २ ॥

आत्मप्रचारं निजकर्मजाते
यथा न कुर्यामयि तत्र पश्य ।
स्वमेव कामं कुरु, देव, पूर्णं
ममेह लोके श्वसितस्य मध्ये ॥ ३ ॥

याचेऽनिशं ते चरमां च शान्तिं
प्राणेषु मे तें परमां च कान्तिम् ।
मामेव, देव, व्यवधाय तिष्ठ
चित्तारविन्दस्य दलस्य मध्ये ॥ ४ ॥

(२)

कामान् प्रभूतानिह कामयेऽहं
प्राणान् विधायापि पणं तदर्थम् ।
त्वं मामरक्षो ननु वञ्चयित्वा
कृपा कठोरा मम सञ्चयः सा
जीवामि यावदिह जीवलोके ॥ १ ॥

अयाचितं त्वं किमदा न मह्यं
तनुं मनः खं श्वसितार्कभासौ ।
दानस्य कृत्वा महतोऽस्य योग्यं
दिने दिने कर्षसि मां सकाशम्—
अत्युत्कटेच्छाभयतो हि रक्षन् ॥ २ ॥

चलामि मार्गं तव चाभिलक्ष्य
कदापि नो वा स्मृतिलुप्तिहेतोः ।
हे निष्ठुर, त्वं न हि वर्तसे यत्
सदैव मे नेत्रपथं गतः सन्-
क्षणेऽक्षणे त्वं किमु नापयासि ॥ ३ ॥

जाने हि जाने करुणा तवैषा-
ग्रहीतुकामो विमुखीकरोषि ।
योग्यं विधातुं तव सङ्गमस्य
पूर्णं करोषि श्वसितं ममेदम्
अर्धैषणासङ्कटतो हि रक्षन् ॥ ४ ॥

(३)

ज्ञप्तं कियन्मेऽविदितं यदासीत्
स्थानं च दत्तं कियदालयेषु ।
दूरं च, बन्धो, निकटं व्यधत्थाः
सौभ्रात्रबद्धं कृतवान् परं च ॥ १ ॥

हित्वा पुराणं सदनं यदैमि
जागर्ति चिन्ता भविताधुना किम् ।
मध्येनवं त्वं सततं पुराणो
हन्तेति तत्त्वं वत विस्मरामि ॥ २ ॥

जन्मान्तकाले निखिलेऽत्र लोके
यत्र, प्रभो, नेष्यसि मां यदैव ।
विज्ञात हे मे चिरजीवनस्य !
त्वयैव वेद्यान्यखिलानि तत्र ॥ ३ ॥

ज्ञाते त्वयीहास्ति परो न कश्चित्,
न कापि बाधा, न च कापि भीतिः ।
जागर्षि कृत्वाखिलमेकसंस्थं-
यथाप्नुयां त्वां क्रियतां तथैव ॥ ४ ॥

(४)

नैषार्थना—'मां विपदोऽभिरक्ष',
भयं ममास्तां न हि जातु तस्याः ।
न सान्त्वना ते यदि तप्तचित्ते
दुःखं विजेतुं मम शक्तिरस्तु ॥ १ ॥

किञ्चित् सहायं यदि नाप्नवानि
बलं न मे त्रुट्यतु जातु दभ्रम् ।
लोके क्षतिश्चेदथ वञ्चनं वा
चित्ते क्षयस्यास्य न भावनास्तु ॥ २ ॥

नाभ्यर्थनैषा—'भव रक्षिता मे',
याचे स्वशक्त्या तरणं भवाब्धेः ।
भारं लघूकृत्य न सान्त्वयेश्चे-
च्छक्तिर्ममास्तां वहनाय तस्य ॥ ३ ॥

विनम्रमस्तो दिवसे सुखस्य
मुखं विजानामि पुरा तवाहम् ।
दुःखस्य रात्रौ यदि वञ्चितः स्यां
न संशयोऽस्तु त्वयि, देव, जातु ॥ ४ ॥

(५)

हे सन्निकृष्टादपि सन्निकृष्ट !
विकाशय त्वं मम मानसं भोः ।
कुरूज्ज्वलं सुन्दरनिर्मलं तत्
कुरून्नतं वीतभयं च जाग्रत् ॥ १ ॥

अनारतं त्वं कुरु मङ्गलं मे
मां जाड्यहीनं गतसंशयं च ।
युक्तं च सर्वैः सह मां विधेहि,
मुक्तं तथा मे कुरु बन्धनं च ॥ २ ॥

ममेह लोकेऽखिलकर्ममध्ये
छन्दः प्रशान्तं तव सङ्गमय्य ।
त्वदङ्घ्रिपद्मे चलमानसं मे
निस्पन्दितं हे कुरु नन्दितं च ॥ ३ ॥

(६)

प्रीतौ सुगन्धे श्वसिते च गाने
प्रभातिमध्ये पुलकेऽमला ते ।
द्यावापृथिव्यौ परिपूर्य कृत्स्ने
पीयूषधारा पतति क्षरन्ती ॥ १ ॥

त्रुट्यन्ति वन्धाः सकलासु दिक्षु
जागर्ति हर्षः परिगृह्य मूर्तिम् ।
पूर्णं ममेदं श्वसितं च जातं
सम्यग्घनीभूतसुधारसेन ॥ २ ॥

मच्चेतना मञ्जुलवाः सरस्यां
स्फुटाभवत् पद्ममिवातिहर्षात् ।
तवाङ्घ्रियुग्मे सकला हि तस्याः
पेतुः क्षरन्तो मधुविन्दवश्च ॥ ३ ॥

आलोकमध्ये स्वनवर्जिते च
प्रवोधवत्यां हृदयप्रतीरे ।
सुदक्षिणोषोदयरक्तकान्तौ
निष्पन्दनेत्रावरणं ससार ॥ ४ ॥

(७)

नवं नवं त्वं परिगृह्य रूपं
प्राणेषु भो मे समुपेहि, देव ।
आयाहि गन्धेऽखिलवर्णमध्ये
तथा च गीते विततेऽत्र विश्वे ॥ १ ॥

आयाहि चित्तेऽमृतसेकहृष्टे
स्पर्शेन ते मे पुलकाचिताङ्गे ।
आयाहि मुग्धे पुटबद्धनेत्रे
नवं नवं त्वं परिगृह्य रूपम् ॥ २ ॥

एह्येहि कान्तोज्ज्वलनिर्मल त्वं
स्निग्ध प्रशान्तोत्तममूर्त एहि ।
एह्येहि चित्रैर्विविधैर्विधानै-
र्नवं नवं त्वं परिगृह्य रूपम् ॥ ३ ॥

सुखेषु दुःखेषु च मर्ममध्ये
समेहि कर्मस्वखिलेषु नित्यम् ।
कर्मावसानेऽपि समेहि, देव,
नवं नवं त्वं परिगृह्य रूपम् ॥ ४ ॥

(८)

क्षेत्रेऽद्य धान्यस्य चलत्यशेषा
छायातपस्यातिरहस्यलीला ।
शुभ्राभ्रनौका गगनेऽद्यनीले
संप्लाविताः केन न वेद्मि हन्त ॥ १ ॥

विस्मृत्य पातुं मधुपा मधूनि
भानोः करेऽद्य प्रमदा भ्रमन्ति ।
जातः किमर्थं सरितस्तटेऽद्य
रथाङ्गनाम्नां मिथुनस्य मेलः ॥ २ ॥

भ्रातर्न गच्छामि गृहं स्वमद्य
वदामि भूयो, 'न हि यामि गेहम् ।'
बाह्यानि वस्तूनि नभोऽद्य भित्त्वा
गृह्णामि सर्वाणि विलुण्ठनेन ॥ ३ ॥

स्रोतस्विनीस्फीतजले हसन्तो
धावन्ति फेनाः पवनेरिता वै ।
वंशीं निरर्थं ननु वादयित्वा
वेलां समग्रां गमयामि चाद्य ॥ ४ ॥

(६)

अद्यागतानन्दपयोधिवन्या-
निषीदतादौ तरणौ समेताः ।
अरित्रमादाय ततः कराभ्या-
माकर्षताकर्षत तद् बलेन ॥ १ ॥

भारान् ग्रहीष्ये यति दुःखपोते
नेष्यामि पारं तति निश्चितं मे ।
प्राणा मदीया यदि यान्ति यान्तु,
तरङ्गभङ्गोपरि यामि नूनम् ॥ २ ॥

क एष आकारयते हि पश्चात्
क एष भूयः कुरुते निषेधम् ।
आख्याति को नाम भयस्य वार्तां
भयं तु सर्वं विदितं ममास्ते ॥ ३ ॥

शापेन केन, ग्रहदोषतो वा
भूमौ सुखायां स्थितिमाचरेयम् ।
नौवस्त्ररज्जुं वलतो विधृत्य
यास्यामि गीतान्यभितो विगायन् ॥ ४ ॥

(१०)

त्वत्स्वर्णपात्रेऽद्य सुसज्जयामि
दुःखाश्रुधारा गलिता ममाक्ष्णोः ।
ग्रथ्नामि ताभिस्तव कण्ठयोग्यां
मुक्तास्रजं, हे जननि, प्रकामम् ॥ १ ॥

पादान्तिके ते शशि-सप्तसप्ती
निवद्धमाल्ये इव सम्प्रकास्तः ।
भूषा ममैषा शतदुःखजाता
शोभिष्यते वक्षसि तेऽभिमन्ये ॥ २ ॥

धनं च धान्यं च यदस्तिलोके
तवैव सर्वं वद का चिकीर्षा ।
दातुं यदीच्छेः कुरु मे प्रदानं
ग्रहीतुकामासि गृहाण सर्वम् ॥ ३ ॥

दुःखं मदीयं स्वकगेहवस्तु-
रत्नं विशुद्धं तु तदेव वेत्सि ।
दत्त्वा प्रसादं यत एव, देवि
क्रीणासि तद्धै मम गर्व एषः ॥ ४ ॥

(११)

वद्धो हि दाम्ना सितकाशगुच्छः
शेफालिकास्रग् ग्रथितापि चैका ।
सज्जीकृतं सन्नवधान्यशीर्षै-
रस्माभिरानायि तथैक पात्रम् ॥ १ ॥

आयाहि मातः शरदो हि लक्ष्मीः !
स्वकीयशुभ्राभ्ररथे निषण्णा ।
आयाहि भो भो विगताम्वुवाह-
मार्गेण नीलेन सुनिर्मलेन ॥ २ ॥

आयाहि दीप्त्युज्ज्वलधौतगात्रे
सुश्यामलेऽरण्यगिरौ तथाद्रौ ।
आयाहि मातर्मुकुटे निधाय
तुषारपृक्तान्यपि पङ्कजानि ॥ ३ ॥

भ्रष्टप्रसूनासनकीर्णकुञ्जे
प्रवृद्धगीर्वाणसरित्तटे च ।
त्वत्पादमूले निजपक्षयुग्म-
पातेच्छया हंसकुलं समेति ॥ ४ ॥

त्वत्स्वर्णवीणागुणगुञ्जनेन
झङ्कारमेकं तनु धीरमन्दम् ।
हासाप्लुतो वै स्वर एव तस्माद्
गलिष्यति स्वे क्षणिकाश्रुधारे ॥ ५ ॥

क्षणे क्षणे तेऽलकपाशकोणे
देदीप्यते स्पर्शमणिर्य एव ।
तं सानुकम्पेन करेण, देवि,
मुहूर्तकं मर्शय मानसे मे ॥ ६ ॥

स्पर्शेन तस्य क्षणिकेन सर्वा
स्वर्णत्वमेवैष्यति भावना मे ।
आलोक मालोज्ज्वलतामुपेत्य
विद्राविता स्यात् सकला तमिस्रा ॥ ७ ॥

(१२)

शीतांशुशुभ्रेऽमल पोतपट्टे
लग्नोऽद्य मन्दो मधुरश्च वातः ।
न जातु दृष्टो, न च दृष्टपूर्वं
एवं विधिर्वै तरिवाहनस्य ॥ १ ॥

आनीयते कस्य तटात् पयोधेः
कस्यातिदूरस्य धनं न जाने ।
मनस्तया पुप्लुषते मदीयं
हित्वाप्तिकामौ पुलिनेऽत्र कृत्स्नौ ॥ २ ॥

मत्पृष्ठतो झर्झरवारिधाराः
क्षरन्ति घोराम्वुदशब्दमध्ये ।
विच्छिन्नधाराधररन्ध्रमार्गैः
पतन्ति वक्त्रेऽरुणरश्मयश्च ॥ ३ ॥

कस्त्वं वदाहो तरिकर्णधार !
कस्याश्रुहासस्वमिदं च पोते । (स्व = धन)
स्वरेण केन प्रतिवध्य यन्त्रं
सङ्गीतकं किं विदधासि चाद्य ॥ ४ ॥

(१३)

उन्मुच्य चित्तं किमदर्शमद्य-
समागता नेत्रविमोहिनी त्वम् ॥

शेफालिपार्श्वे च्युतपुष्पराशौ
तुषारसिक्तेषु तृणेषु पादौ ।
रक्तौ निधायारुणदेहकल्पौ
समागता नेत्रविमोहिनी त्वम् ॥ १ ॥

छायातपाभ्यां रचिताञ्चलं ते
लुण्ठत् पतत्येव वने वने च ।
आधाय दृष्टिं कसुमान्यमुष्मिन्
वक्त्रे नु किं वै स्वगतं वदन्ति ॥ २ ॥

सर्वे वयं ते वरणं विदध्मो-
निराकुरु त्वं वदनस्य वासः ।
अदः पयोदावरणं च शिष्टं
दूरीकुरु त्वं सबलं भुजाभ्याम् ॥ ३ ॥

द्वारेष्विदानीं वनदेवतायाः
शङ्खध्वनिः श्रूयत एव सान्द्रः ।
आकाशवीणाप्रतितन्त्रिमध्ये
जागर्ति गीतिर्भुवनागतेस्ते ॥ ४ ॥

ध्वनत्यहो काञ्चननूपुरं क्व-
मन्ये नु तन्मे हृदयस्य मध्ये ।
भावेषु कर्मस्वखिलेषु, देवि
पाषाणविद्राविसुधां निषिच्य
समागता नेत्रविमोहिनी त्वम् ॥ ५ ॥

(१४)

तवाम्ब ! दृष्टं करुणाङ्घ्रिपद्म-
मद्यात्र रक्ते रविरश्मिरूपे ।
अम्बोत्थिता ते ह्यतिमृत्युवाणी
तुष्णीमशब्दं गगनं वितत्य ॥ १ ॥

नमामि भोस्त्वाखिललोकमध्ये
धनं निवेद्याद्य तनुं मनश्च ।
मद्भक्तिपूतार्चनधूपमध्ये
तवाम्ब ! दृष्टं करुणाङ्घ्रियुग्मम् ॥ २ ॥

(१५)

संव्याप्य विश्वं रणति प्रकामं
स्वरैरुदारैः सुखहर्षगीतिः ।
सती गभीरा स्वनिता कदा स्यात्
सा नाम गीतिर्हृदये मदीये ॥ १ ॥

समीरणालोकपयोनभःसु
प्रीतिः कदा मे भविताखिलेषु ।
चित्तासनं व्याप्य कदा हि तानि
नानैव सञ्जासु पुरासते वा ॥ २ ॥

उन्मीलिते नेत्रयुगे कदा वै
चित्तं प्रसन्नं भविता मदीयम् ।
यमेव मार्गं भुवने वरिष्ये
यास्यामि नूनं परितोष्य सर्वान् ॥ ३ ॥

तदस्तिवार्ता सततं कदा मे
जीवद्दशायां सुगमा भवेद्वै ।
स्वयं तथा च ध्वनितं कदा स्यात्
सर्वेषु कार्येषु तवैव नाम ॥ ४ ॥

(१६)

मेघो हि मेघोपरि सञ्चितोऽभूद्
घनान्धकारः प्रसृतः समन्तात् ।
द्वारस्य पार्श्वे कुरुषे कथं मा-
मेकाकिनं, देव, निषेदिवांसम् ॥ १ ॥

कार्यस्य वारेऽखिलकर्ममग्न-
स्तिष्ठामि नानाजनमध्यवर्ती ।
परं ममाद्य प्रतिहारपार्श्वे
वर्ते निषण्णः प्रतिपालयंस्त्वाम् ॥ २ ॥

न दर्शनं चेत् प्रददासि मे त्वं
करोषि मां प्रत्यवधीरणां च ।
कथं हि वर्षादिवसं मदीयं
वद प्रकाशं गमयामि चेतम् । ३ ॥

अहं सुदूरं प्रति बद्धदृष्टिः
पश्यन् वितिष्ठे ननु केवलं च ।
उन्मत्तवाताहतमानसं मे
विरौति नित्यं शृणु, देवदेव ॥ ४ ॥

(१७)

आलोक आलोक इहास्ति रे क्व
सन्दीपयैतं विरहानलेन ।
सन्ति प्रदीपा, न शिखास्तु सन्ति
ललाटलेखा किमु हा ममैषा ॥
इतो वरं मे मरणं भवेऽस्मिन्
तनु प्रदीपं विरहानलेन ॥ १ ॥

दूती कुतो गायति वेदनाया
"रे चित्त, नित्यं शृणु रे त्वदर्थे ।
जागर्ति विश्वे भगवान् स्वयं स—
मा ते भयं भूद्भुवने कदाचित् ॥" २ ॥
घनान्धकारे सघने निशीथे
प्रेमाभिसारे गमनाय स त्वाम् ।
समाह्वयत्येव सदैव लोके
दुःखं स दत्त्वावति मानमेवम् ॥ ३ ॥

जागर्ति विश्वे भगवान् त्वदर्थे ।
नभस्तले संवितते पयोदै-
र्वर्षापधाराः सरवं पतन्ति ।
किमर्थमस्यां निशि जागरित्वा
मुमूर्षतीवाद्य मनो मदीयम् ॥ ४ ॥

क्षणप्रभा सा क्षणदीप्तिदानात्
तमः प्रगाढं कुरुते च नेत्रे ।
मार्गोन्मुखं चित्तमिदं विधातुं
जाने न कुत्र स्वनितं सुदूरे
स्वरैर्गभीरैर्मधुगीतमेकम् ॥ ५ ॥

आलोक आलोक इहास्ति रे क्व
सन्दीपयैतं विरहानलेन ।
गर्जन्ति मेघाः, स्वनति प्रवातः,
काले व्यतीते गमनं हि न स्यात्,
प्रगाढ़ रात्रिर्निकषाश्मकृष्णा
प्राणाग्निना प्रेमशिखां समिन्त् स्व ॥ ६ ।

(१८)

नभस्यमेघाहृतचित्तवृत्तिः
सुगुप्तपादौ धरणौ निपात्य ।
सर्वस्य दृष्टिं परिहाय, देव,
निशेव निर्वाक् समुपस्थितस्त्वम् ॥ १ ॥

निमील्य नेत्रे स्फुरति प्रभातं
वायुर्वृथा गर्जति धावमानः ।
आवृत्य नग्नं गगनं सुनीलं
केनाद्य मेघैः खचितं तदेव ॥ २ ॥

वनस्थलं कूजनहीनमास्ते
द्वाराणि रुद्धान्यखिलालयानाम् ।
सहायहीनः पथिकोऽसि कस्त्वं
वदात्र पान्थ, रहिते च मार्गे ॥ ३ ॥

भो एकबन्धो ! प्रिय ! वर्ततेऽत्र
निरर्गलं वै भवनं मदीयम् ।
त्वं स्वप्नतुल्यं पुर एव, पान्थ,
विसृज्य मा गा अवहेलया माम् ॥ ४ ॥

(१९)

आषाढसन्ध्यैति घनायमाना
प्रायेण यातो दिवसोऽवसानम् ।
घनाम्बुधारा गतबन्धनेव
क्षरत्यशेषं भुवि सान्तराला ॥ १ ॥

निषण्ण एको भवनैककोणे
विचिन्तयामि स्वगतं नु किञ्चित् ।
यूथीवनान्तः सजलश्च वातो
वचो नु किञ्चित् कथयन् प्रयाति ॥ २ ॥

अद्याहतं मे हृदयं तरङ्गै-
र्विचित्य कूलं न लभेऽस्य किञ्चित् ।
वर्षोदकार्द्रा वनपुष्पराजिः
स्वसौरभै रोदयतेऽन्तरं मे ॥ ३ ॥

तमोघनायाः प्रहरान् निशायाः
स्वरेण केनाद्य करोमि पूर्णान् ।
भ्रमेण केनाद्य विलुप्तबुद्धिः
समाकुलान्तःकरणोऽवतिष्ठे ॥ ४ ॥

(२०)

अद्याभिसारस्तव वातरात्रौ
हे प्राणबन्धो, मम मित्रवर्य ।
हताशकल्पं गगनं विरौति
निद्राद्वियुग्मं व्यजहान्मदीयम् ।
उद्घाटयामि प्रतिपालयंस्त्वां
द्वारं सखेऽतः सततं गृहस्य ॥ १ ॥

पश्यामि किञ्चिन्न वहिः सखेऽत्र
क्व तेऽस्ति पन्था इति भावयामि ।
अन्धेऽन्धकारे गहने वने वा
सुदूरनद्या अथवा प्रतीरे ।
निवेद्यतां कुत्र तव प्रयानं
हे प्राणबन्धो, प्रिय मित्रवर्यं ॥ २ ॥

(२१)

जाने हि जाने कुत आदिकाला-
ज्जीवप्रवाहे कृतवान् प्लुतं माम् ।
गृहेषु मार्गेषु मनः स्वकस्मात्
कति प्रहर्षांश्चितवान्, प्रिय, त्वम् ॥ १ ॥

मेघान्तराले कतिकृत्व एवं
गच्छन् स्थितस्त्वं मधुरं हसित्वा ।
पादौ निधायारुणभानुरश्मौ
स्पर्शं ललाटे ह्यदधाः शुभं मे ॥ २ ॥

कालेषु लोकेषु नवप्रभासु
कतिष्वशेषेषु चितानि सन्ति ।
अस्मिन् ममाद्यणोर्युगले कियन्ति
ह्यरूपरूपस्य विलोकितानि ॥ ३ ॥

कियद्युगेष्वेव न वेत्ति कश्चिद्
दुःखे सुखे प्रेमणि गीतिकायाम् ।
निरन्तरालामृतवारिवर्षं
चित्तं मदीयं कुरुते प्रपूर्णम् ॥ ४ ॥

(२२)

कथं सुगातर्विदधासि गीतं
तत् केवलं वै हतवाक् शृणोमि ।
स्वरप्रभा ते भुवनं तनोति
व्याप्नोति खं च स्वरमातरिश्वा ॥
शिलाकुला त्रुट्यति वेपशीला
वहत्यजस्रं स्वरजाह्नवी च ॥ १ ॥

गायामि मन्ये स्वरतो तवेत्थ-
मन्विष्य कण्ठे न लभे स्वरं तु।
वाग् वाधते मे वचनस्य काले
पराजितं सद् हृदयं विरौति ॥
क्षिप्तस्त्वयाहं वद कुत्र पाशे
स्वरस्य जालं परितो विधाय ॥ २ ॥

(२३)

नेपथ्यमार्गं भजतस्तवेत्थं
स्थाने न मन्ये रहसि प्रयाणम्।
वसाधुना मे हृदये सुगुप्तं
वेद्यं न केनापि, न चाभिधेयम् ॥ १ ॥

देशे विदेशे कियती गतिर्मे
सर्वत्र विश्वे तव गुप्तलीला।
वदाधुना यास्यसि दृश्यतां मे
चित्तैककोणे, न च वञ्चनास्तु ॥ २ ॥

जानाम्यहो मे कठिनं हि चित्तं
न ते वसेदं चरणार्पणार्हम्।
त्वदङ्गवातं प्रतिलभ्य किन्तु
किं, देव, नो यास्यति तद् द्रवत्वम् ॥ ३ ॥

कामं ममास्ते नहि साधनात्र
कृपालवे ते त्वरितेऽपि किन्तु।
पुष्पोद्गमः किं न निमेषमध्ये
फलोद्गमो वा भविता क्षणेन ॥ ४ ॥

नेपथ्यमार्गं भजतस्तवेत्थं
स्थाने न मन्ये रहसि प्रयानम् ॥ ५ ॥

(२४)

प्रभो न लभ्यं यदि जीवनेऽस्मिन्
त्वद्दर्शनं तर्हि मयासि नाप्तः—
जागर्तु चित्ते सततं कथैषा।
सुप्तौ प्रबोधे च लभे यदार्तिं
मा गात् स्मृतिर्मे मनसो हि तस्याः ॥ १ ॥

भवस्य हट्टे यति यान्त्यहानि
धनैश्च पूर्णौ यतिभिः स्वहस्तौ।
तथापि किञ्चित् समवापि नात्र—
जागर्तु चित्ते सततं कथैषा ॥ २ ॥

स्यां चेन्निषण्णः पथि जाड्यभावाद्
यत्नैर्विदध्यां यदि पांशुशय्याम्।
तथापि शिष्येत समग्रमार्गो—
जागर्तु चित्ते सततं कथैषा ॥ ३ ॥

हासो हि यावानुदियादगारे,
वंशीरवस्तत्र तथास्तु यावान्।
सुसज्जितं यावदिहास्तु गेहं
नावाहनं ते ह्यभवत्तथापि ॥ ४ ॥

सुप्तौ प्रबोधे च लभे यदार्तिं
मा गात् स्मृतिर्मे मनसो हि तस्याः ॥ ५ ॥

(२५)

रूपाणि धृत्वा कति काननाद्रि-
नभोऽब्धिमध्ये वहु सज्जमानः ।
पश्यामि, देवाहरहस्त्वदीयो
विश्वेऽखिले राजति विप्रयोगः ॥ १ ॥

नभस्यधाराप्लुत-पल्लवेषु
ध्वनत्यहो ते भुवि विप्रयोगः ।
सर्वां त्रियामां प्रतितारके च
तुष्णीं स तिष्ठत्यनिमेषनेत्रः ॥ २ ॥

प्रीतिष्वथाहो कतिकामनासु
सुखेषु दुःखेष्वपि कर्मजाते ।
प्रत्यालयं हा कतिवेदनासु
घनायते ते विरहो गभीरः ॥ ३ ॥

कृत्वा हृग्दासं श्वसितं समग्रं
स्वरेषु गीतेषु कतिस्वहो सः ।
गलन् च्चरन् मे हृदयस्य मध्ये
प्रयाति पूर्तिं विरहस्तवैव ॥ ४ ॥

(२६)

वेलावशेषो न हि विद्यतेऽत-
श्छायावतीर्णारसि भूतधात्र्याः ।
चलाधुना घट्टमभि प्रतीरे
विभर्तुमद्भिः कलशं स्वकीयम् ॥ १ ॥

कीलालधाराकलनिस्वनो रे
पर्याकुलं सान्ध्यनभो विधत्ते ।
ध्वनिः स मे कर्णपथं समेतो
मार्गे सदा माह्वयति प्रकामम् ॥ २ ॥

नास्तेऽधुना निर्जनमार्गमध्ये
जनस्य कस्यापि गतागतं वै ।
प्रेमापगायामुदितास्तरङ्गा,
उद्दामवेगः पवनश्च जातः ॥ ३ ॥

गृहे निवृत्तो भवितास्मि नो वा
जाने न, कैः कैः सह संस्तवः स्यात् ।
अज्ञातनामा स जनस्तरण्यां
घट्टे स्थितः वादयते स्ववीणाम् ॥ ४ ॥

चलाधुना घट्टमभि प्रतीरे ।
बिभर्तुमद्भिः कलशं स्वकीयम् ॥ ५ ॥

(२७)

प्रपूर्णवर्षा भुवि संप्रवृत्ता,
मेघाम्बुधाराः सरवं पतन्ति ।
उद्दामवेगा नभसो विभेत्र्यो
न क्वापि दभ्रं विरमन्ति ताश्च ॥ १ ॥

क्षणे क्षणे शालवने प्रवाता
धुन्वन्ति वृक्षान् महता रवेण ।
आपः प्रधावन्ति भुजङ्गगत्या
केदारमाप्लुत्य समन्ततश्च ॥ २ ॥

जटाकलापं परितोऽम्बुदाना-
मुत्पात्य कोऽत्र प्रकरोति नृत्यम् ।

प्रस्फुटितं चित्तभरेऽत्र पुष्टौ
प्रभञ्जनेनापि हृतं तदेव ।
उद्वेलयित्वा मम नाम वक्षः
कस्यात्र पादे निपतन्ति भङ्गाः ॥ ३ ॥

चित्तेऽत्र कीदृक् कलनाद एव !
द्वारार्गलानि त्रुटितान्यभूवन् ।
उन्माद एको हृदयेऽभ्यजाग-
भाद्रेऽत्र मासे घनजालबद्धे ॥ ४ ॥

एवंविधः को धरणीतलेऽत्र ।
जातः प्रमत्तो बहिरन्तरे च ॥ ५ ॥

(२८)

जानामि यद्युं मयं त्वदर्थं
न दर्शये ते तदपि, नाथ ।
सत्यावशिष्टे पथिकदृष्टि—
स्तथापि मह्यं ननु रोचते तत् ॥ १ ॥

भूयो नियतां प्रतिहारपाश्च
मद्भिक्षुचित्तं करुणार्थि हा ते ।
कृपान्वते सा न, तथापि याचे—
चित्तस्य सौख्यं यत एतदेव ॥ २ ॥

अग्रे गता हा भुवनेऽत्र सर्वे
कार्यार्थिनो वा हि, सुखार्थिनो वा ।
सहायहीनो भुवि कामये त्वां—
चित्तस्य सौख्यं यत एतदेव ॥ ३ ॥

पीयूषपूर्णा धरणी समन्ता-
न्मामाकुला रोदयतेऽनुरागात् ।
अदर्शनात्ते व्यथितं मनो मे—
तथापि मे रोचत एतदेव ॥ ४ ॥

(२६)

वद्धोऽस्मि हाहा जनवित्तपाशै-
स्तथापि चित्तं, शृणु, काङ्क्षति त्वाम् ॥ १ ॥

हे चित्तवेदिन्! हृदि ते निवासो
मत्तोऽधिकं मां ननु वेत्सि, नाथ ।
सुखासुखैर्विस्मृत-सर्ववृत्ति
चित्तं मदीयं, शृणु, वाञ्छति त्वाम् ॥ २ ॥

नाहङ्कृतिं स्म प्रभवामि हातु-
मस्ते वहंस्तां परितो भ्रमामि ।
जीवामि हा चेदलमस्मि मोक्तुं
जानीहि चित्तं त्वयि रज्यते मे ॥ ३ ॥

स्वकं यदास्ते सकलं कदा मे
ग्रहीष्यसि स्वेन करेण हा तत् ।
सर्वं जहत् त्वां निखिलं प्रपत्स्ये,
मनो मनस्येव सदेप्सति त्वाम् ॥ ४ ॥

(३०)

प्रीतिस्तवैषा खलु, चित्तहारिन्
पत्रेषु यन्नृत्यति हेमरश्मिः ।
घनोऽम्बरे यत् प्लवते सुधीरं
देहेऽमृतं सिञ्चति यत् समीरः ॥ १ ॥
प्रीतिस्तवैषा खलु, चित्तहारिन् !

प्रभातभात्याप्लुतमक्षि यन्मे
त्वत्प्रेमवाणी हृदयागता सा ।
नताननं ते मयि नेत्रमाधात्
स्पर्शं पदोऽन्ते हृदयं यदाप्नोत् ॥ २ ॥
प्रीतिस्तवैषा खल, चित्तहारिन् !

(३१)

तवैव गीतिं महिमानुवद्धां
लोकेऽत्र गातुं स्थितवान् किलाहम् ।
जगत्-सभायां तव विस्तृतायां
स्तोकं पदं मे प्रतियच्छ, देव ! । १ ।

अहं प्रभो ते भुवनस्य मध्ये
कार्ये न कस्मिन्नपि योग्य आसम् ।
भोः केवलं त्वत्स्वरजालवद्धाः
प्राणा ममैतेऽकृतिनो रणन्ति ॥ २ ॥

आराधनं ते भुवि जायते हे
रात्र्यामशब्दामरमन्दिरेषु ।
तस्मिन् हि काले, जगदेकनाथ,
मामेव गानाय समादिशं त्वम् ॥ ३ ॥

यदा प्रभाते गगनं वितत्य
हेमस्वरैस्ते रणितात्मवीणा ।
यथा न दूरे स्थितिमाचरेयं
मानं तदेतं सदयं प्रदेहि ॥ ४ ॥

(३२)

मम भ्रमाणां कुरु हे निरासं
पराञ्च वक्त्रं प्रति मामदस्ते ॥ १ ॥

पार्श्वे स्थितस्त्वामवयामि नाहं,
पश्यामि किं हा दिशि नापि जाने ।
जानामि हे, त्वं मम हृद्विहारी
निधेहि दृष्टिं हृदये हसित्वा ॥ २ ॥

काञ्चित् कथां मां वद, देवदेव,
दया परश्च स्पृश मे शरीरम् ।
वामेतरं चापि करं प्रसार्य
मामुन्नतं त्वं कुरु, देवदेव ॥ ३ ॥

य एव वोधो भ्रम एव मे स
विचीयते यत् सकलं मृषेव ।
हासश्च मिथ्या, रुदितं च मिथ्या
भ्रमं ममेतं दवयागतः सन् ॥ ४ ॥

(३३)

एभिर्मनो मे परिवेष्टितं च
समावृतं चास्ति तिरस्करिण्या ।
पुञ्जीभवन्त्येव कथाश्च नाना
सर्वासु दिक्षु क्रमते च चित्तम् ।
क्रमेण दाहः परिवर्धते च
त्वदङ्घ्रिपद्मं वत नाशयामि ॥ १ ॥

निःशब्दवाणी तव हृत्तले मे
कोलाहले मज्जतु मा जनानाम् ॥ २ ॥

मध्येजनं तिष्ठ मया समं हे
मामात्ममध्ये च सदावृणुष्व ।
मच्चेतनायां हि निधेह्युदार-
मालोकपूर्णं भुवनत्रयं च ॥ ३ ॥

(३४)

कुतो हि कालात् समुपैषि, देव
मयैव सार्धं तव मेलनार्थम् ।
स्थाने च कस्मिंस्तव चन्द्रसूर्यौ
प्रच्छाद्य भोस्त्वांवद रक्षितारौ ॥ १ ॥

सायं प्रभाते कियतो दिनस्य
श्रुतो मया ते हृदि पादशब्दः ।
अहो सुगुप्तं हृदयं प्रविश्य
मामाह्वयंस्ते गत एव दूतः ॥ २ ॥

व्याप्यान्तरं, पान्थ, ममेव सर्वं-
मुदेति हर्षोऽद्य विकम्पमानः ।
प्राप्ते हि काले मम कार्यजातं
गतं समाप्तिं भुवनेऽद्य मन्ये ।
तदङ्गगन्धेन वपुर्विलिप्य
समेति वातो वत, देवदेव ॥ ३ ॥

(३५)

एह्येहि वर्षाजलपातमध्ये
हे वारिगर्भाम्बुद ! मत्सकाशम् ।
स्नेहं सुकृष्णं विपुलं च सिञ्च-
न्नायाहि भो भो मम जीवनेऽस्मिन् ॥ १ ॥

आयाहि गोभृच्छिखरं विचुम्ब्य
छायावलिप्तं विपिनं विधाय ।
आयाहि हे त्वं गगनं वितत्य
गम्भीरनादैः ककुभो विकम्प्य ॥ २ ॥

व्यथातुरं जायत एव नीप-
वनं प्रसूनैः पुलकाचितैश्च ।
समुच्छलं क्वापि भवत्यशेषं
कूलेषु नद्या कलरोदनं च ॥ ३ ॥

एह्येहि भो मे मनसो विभर्त-
रेह्येहि तृष्णान्तक हेऽम्बुवाह ।
एह्येहि नेत्रद्वयशैत्यकारि-
न्नेह्येहि चित्तस्य च सन्निकर्षम् ॥ ४ ॥

(३६)

शक्यो न किं छन्दसि योक्तुमत्र
भङ्ग-प्लुति भ्रंश-समुत्थहर्षः ।
शृणोषि नो किं किल दत्तकर्णो
दिशां समूहे गगनप्रचारं
मृत्योः स्ववीणास्वर निक्वणं तम् ।
चन्द्रार्कतारानिचयेषु वह्नि
प्रज्ज्वलं धावज्ज्वलतोऽपि हर्षः
शक्यो न किं छन्दसि योक्तुमत्र ।
उन्मादकं गीतलयं निशम्य
धावत्यसौ कुत्र क एव वेत्ति
पृष्ठं परावृत्य न वीक्ष्यते सः ।
विलुण्ठ्य यातस्य विलभ्य हर्षं,
वन्धेन नो तिष्ठति चापि वद्धः ॥ १ ॥

आनन्दनोत्फुल्लतदङ्घ्रिपाते
नृत्यन्ति मत्ता ऋतवो हि षट् ते ।
संप्लावनं रे वहते धरायां
गीते च वर्णे च सुसौरभे च
हर्षान्मृतिक्षेपविसर्गजातात् ॥ २ ॥

(३७)

स्वप्नो निशायास्त्रुटितो ममैष,
तेनैव साधं त्रुटितश्च वन्धः ।

नाविद्यतात्र हृदयेऽन्तरालो
वहिः समागामभि सर्वविश्वम् ।
स्फुटानि जातानि तथा ममैव
दलानि सर्वाणि हृदम्वुजस्य ॥ १ ॥

द्वारं तु भङ्क्त्वा स्वयमागतोऽन्ते
स्थितः पुरो मेऽसि यदैव, देव ।
नेत्राम्वुमध्यप्लवमानचित्तं
तदङ्घ्रिपद्मे सपदि व्यलुण्ठत् ॥ २ ॥

प्रभातभातिर्नभसो यदा मा-
मभि व्यधत्त स्वकरप्रसारम् ।
मद्भग्नकाराप्रतिहारदेशे
समुत्थितोऽभूज्जयशब्द एकः ॥ ३ ॥

(३८)

हृद्द्वारदेशे शरदीह काले
समागतः कः पथिकोऽतिथिर्मे ।
आनन्दगानं कुरु मे मनो रे
पुनश्च भूयः कुरु गानमेतत् ॥ १ ॥

नीलाम्वरस्यारवभारती या
तुषारसिक्ताकुलतापि या रे ।
अस्मिन् दिने ते ध्वनतामशेषं
त्वदीयवीणाप्रतितन्त्रिमध्ये ॥ २ ॥

रे शस्यभूमेः कनकाभगीते
समेन तानेन भवाद्य सङ्गी ।
पूर्णापगाया विमलापधारे
स्वरं कुरु त्वं प्लवमानमद्य ॥ ३ ॥

य आगतस्तन्मुखवद्धदृष्टि-
र्गंभीरसौख्येन तमेव पश्य ।
द्वारं समुद्घाट्य ततो गृहस्य
तेनैव सार्धं च वहिः प्रयाहि ॥ ४ ॥

(३९)

यद्गीतगीत्यै भुवनागतिर्मे
तद्गीतमद्याप्यविगीतमास्ते ।
हा केवलं वर्तत एव मेऽद्य
गानेऽभिलाषः स्वरशीलनं च ॥ १ ॥

न तत्स्वरो वै मयि लग्न एव
न सा कथा मे हृदि गाढ़वद्धा ।
विराजते केवलमात्मचित्ते
तद्गीतिगानाकुलतात्युदग्रा ॥

अद्यापि नो तत् स्फुटमेव पुष्पं,
वहन् गतः केवलमेकवातः ॥ २ ॥

आलोकितं तस्य न जातु वक्त्रं
नाकर्णितं चापि वचस्तदीयम्
क्षणे क्षणे तत्पदशब्दमात्रं
सञ्जायते वै श्रुतिगोचरं मे ।
मार्गेण मद्द्वारपुरःस्थितेन
गतागतिस्तस्य जनस्य चास्ते ॥ ३ ॥

सर्वं दिनं व्याप्य मया तदर्थं
संस्थापितं केवलमासनं हा ।
दीपोऽपि कक्षे ज्वलितो मया न
तस्मादहो तं कथमाह्वयामि ॥ ४ ॥

आशा तदाप्तेर्हृदि वर्तते मे ।
प्राप्तिस्तु नाभूदधुनापि तस्य ॥ ५ ॥

(४०)

नाशं प्रयान्तं कथयार्गलेन
रुद्ध्वेह तिष्ठामि कियन्त्यहानि ।
न नित्यचिन्तां, निशि जागृतिं च
शक्तोऽस्मि कर्तुं पुनरत्र, नाथ ॥ १ ॥

दिवा च नक्तं च पिधाय कक्ष-
मेकोऽवतिष्ठे, सततं च तत्र ।
आगन्तुकामोऽस्ति य एव गेहं
सन्देहतोऽहं दवयेऽसकृत् तम् ॥ २ ॥

एकाकिनो मे भवने हि तस्मात्
कस्यापि न स्यात् पदपुङ्क्तिपातः।
आनन्दपूर्णं भुवनं त्वदीयं
करोति खेलां वाहिरेव नित्यम् ॥ ३ ॥

त्वं चापि मन्ये ह्यनवाप्य मार्ग-
मेत्यैत्य नूनं विमुखः प्रयासि।
यत् कामये रक्षितुमत्र लोके
धूलौ पतित्वैति तदाकृतिं तत् ॥ ४ ॥

(४१)

त्याज्यं ममैतन्मलिनं हि वस्त्रं
त्याज्यं वतैतद् ध्रुवमेव सद्यः
—मलीमसाहङ्कृतिरेव मे तत्।
दिनस्य कार्ये निरतस्य जातं
रजो-विलिप्तं वसनं ममैतत्
कलङ्कलेखां परितो हि विभ्रत्।
एवं वितप्तं च तथोपजातं
यथा मया दुर्वहमेतदेव ॥ १ ॥

कार्यं दिनान्ते ह्यधुना समाप्तं
कालः प्रपन्नोऽत्र तदागते रे
आशाप्युपेत हृदयं मदीयम्।
आगम्यतां स्नानविधिं समाप्य
प्रेमापिधानं परिधेयमद्य।
सायन्तनारण्य-चित प्रसूनै-
र्माला विधेया, समयोऽस्ति नातः ॥ २ ॥

(४२)

उदेति गात्रे मम लोमहर्षो
विघोरता संक्रमतेऽङ्घ्रियुग्मम् ।
केनाद्य वद्धं हृदयं मदीयं
सुरक्त-रक्षा-करवन्ध-सूत्रैः ॥ १ ॥

हे चित्तहारिन् ! नभसस्तलेऽस्मिन्
जले स्थले पुष्पचये फले च
कथं त्वया चित्तमिदं ततं मे,
कीदृक् त्वयाभून्मम खेलनं च ।
प्राप्तं मया किं भुवनेऽत्र, नाथ
विचिन्वतो मे न हि वेत्ति चित्तम् ॥ २ ॥

व्याजेन केनेच्छति रोदितुं मे
हर्षो, न जाने, नयनाम्बुसिक्तः ।
भूत्वा सुमिष्टो विरहोऽपि मेऽद्य
चित्तं ह्यकार्षीत् परिपूर्ण-पात्रम् ॥
अथवा, [सुमिष्टभूतो विरहो मदीय-
श्चित्तं ह्यकार्षीत् परिपूर्णमद्य] ॥ ३ ॥

(४३)

करं प्रभो मावृणु दक्षिणं ते
कुर्वेऽद्य तं रक्षणसूत्रवद्धम् ।
वन्धुं प्रभुः स्यां यदि, देववेद, [बन्ध्+तुम्]
वद्धो भवेयं सह तर्हि सर्वैः ॥ १ ॥

यत्रास्ति यः कोऽपि भवेऽद्य सोऽपि
न शिष्यते वन्धनतो ह्यमुक्तः।
मा स्वे परे भूत् क्वचिदद्य भेदः
समं च पश्यामि गृहे वहिस्त्वाम् ॥ २ ॥

त्वया समं यं विरहं प्रपद्य
क्रन्दन समुच्चैः परितौ भ्रमामि।
तदेव दुःखं त्वरातोऽपि हातुं
त्वामाह्वयामि स्वकचित्तमध्ये ॥ ३ ॥

(४४)

निमन्त्रणं मे भुवि हर्षयज्ञे—
जातं हि जातं नरजन्म धन्यम् ॥ १ ॥

नेत्रद्वयं रूपपुरे ममाद्य
स्वचित्तपूरं भ्रमति प्रकामम्।
अहो तथा श्रोत्रयुगं मदीयं
जातं निमग्नं स्वरतो गभीरे ॥ २ ॥

प्राप्ताधिकारस्तव यज्ञभूमौ
वंशीध्वनिं हे सततं करोमि।
ग्रथ्नंस्तथा हि प्रतिगीतिमध्ये
प्राणाश्रुहासौ भुवि पर्यटामि ॥ ३ ॥

जातोऽधुना किं समयो हि नाथ ?
गत्वा सभां ते वदनं च दृष्ट्वा।
जयध्वनिं स्वं तव कर्णमार्गं
नयन् प्रयामीति निवेदनं मे ॥ ४ ॥

(४५)

प्रभामयं वै प्रभया विधाय
प्रभा प्रभानां समुपागतोऽसि ।
तमोऽपयातं मम नेत्रयुग्माद्—
याता हि याता वत सा तमिस्रा ॥ १ ॥

सर्वा च पृथ्वी गगनं च सर्वं
सहासहर्षैरभवत् प्रपूर्णम् ।
नेत्रे च यस्यां दिशि पातयामि
पश्यामि सर्वं साधुमेव तत्र ॥ २ ॥

प्रभा च सा ते तरुपत्रलग्ना
चित्तं हि मे नर्तयते प्रकामम् ।
प्रभा च सा ते खगनीड़मध्ये
गीतं प्रजाग्रत् कुरुते प्रभाते ॥ ३ ॥

तव प्रभा प्रीतिभरेण धीर-
मागत्य गात्रे पतिता मदीये ।
प्रभा च सा निर्मलहस्तपातैः
परामृशच्चित्तमिदं मदीयम् ॥ ४ ॥

(४६)

त्वदासनाधःस्थितमृत्तिकायां
स्थास्यामि लुण्ठन् सततं भवेऽत्र ।
त्वत्पादपङ्करुहपांशुजालै-
र्लिम्पन् वपुर्धूसरतां प्रपत्स्ये ॥ १ ॥

प्रदाय मानं कथमत्र भूयो
दूरेण मां रक्षसि, देवदेव ।
विश्रान्तिमेवं सुचिरं कृथा मा
दत्त्वापमानं नय मां पदाब्जम् ॥ २ ॥

तिष्ठामि ते यात्रिगणस्य पश्चात्,
प्रदीयतां नीचतमं पदं मे ।
प्रसादमाप्तुं कति धावमाना
आयान्ति लोकास्तव सन्निकर्षम् ॥ ३ ॥

त्वां प्रार्थयिष्ये विषयं न किञ्चित्
स्थास्यामि ते केवल दर्शनार्थी ।
दानात् परं ते ह्यवशिष्यते यद्
ग्राह्यं तदेकं मम, नाथ, नान्यत् ॥ ४ ॥

(४७)

अरूपरत्नान्यधिगन्तुकामो
मग्नोऽस्मि रूपाम्बुधिवारिमध्ये ।
संप्लाव्य जीर्णां तरणीं मदीयां
यास्यामि नातः प्रतिघट्टपारम् ॥ १ ॥

भवत्विदानीं समयः समाप्तं
मद्वीचिमालाऽतिनित्यभोगम् ।
पीयूषमध्ये प्रविलीनकायो
लप्स्येऽमरत्वं मरणं प्रपन्नः ॥ २ ॥

श्रव्यं न गीतं यदिह श्रुतिभ्यां
तत् तत्र नित्यं ध्वनति प्रकामम् ।
मत्प्राणवीणामतलस्य तस्य
नेष्यामि नूनं समिते हि कक्षम् ॥ ३ ॥

चिरन्तनं तं स्वरमेव बद्धा
न्यस्यान्त्यगीतौ रुदितं च तस्य ।
यो नीरवस्तच्चरणाब्जमूले
धास्यामि वीणामरवां मदीयाम् ॥ ४ ॥

(४८)

विकाशमाप्तं नभसस्तलेऽभू-
दालोकमाला-शतपत्रमेकम् ।
दलानि तस्य प्रततान्यभूवन्
स्तरैः स्तरैर्दिक्षु दिगन्तरेषु ॥ १ ॥

समावृतस्तत्क्षणमेव जातो
गाढ़ान्धकाराऽसितवारिराशिः
स्वर्णाभकोषोपरि सन्निषण्णो-
भ्रातः सुखेनात्र वसामि शश्वत् ॥ २ ॥

आलोकमाला शतपत्रमेतद्
धीरं ततिं मां परिवृत्य याति ॥ ३ ॥

तरङ्गमुत्थाप्य नभःशरीरे
प्रयाति वातो वहमान एकः ।
सर्वासु दिक्षु ध्वनतीह गीति-
श्चित्तं तथा नृत्यति धावते ॥ ४ ॥

स्पर्शश्च कश्चिद् गगनायतो मे
लग्नो भवत्येव समस्तगात्रे ।
प्राणाब्धिमध्येऽत्र भवन् निमग्नः
प्राणांश्च गृह्णे परिपूर्य वक्षः
गतागताभ्यां परिवृत्य मां च
पुनः पुनर्वाति समीरणोऽपि ॥ ५ ॥

विस्तीर्य वासोऽञ्चलमेव दिक्षु
मृत्सा धरण्या अददात् स्वमङ्कम् ।
य एव जीवो भुवि यत्र चास्ते
निमन्त्र्य तत् सानयते समीपम् ॥ ६ ॥

सर्वस्य हस्ते, सकलस्य पात्रे
विभज्य सा यच्छति भोज्य-पेये ।

गीतैः सुगन्धैः परिपूर्णचित्त-
स्तिष्ठामि लोके महता सुखेन ।
आवेष्ट्य मां साञ्चलपातपूर्व-
मयच्छदङ्कं सुखदं हि मृत्स्ना ॥ ७ ॥

आलोक ! भोस्त्वां प्रणमामि भक्त्या
भवत्वदृश्यो भुवि मेऽपराधो
निधेहि भाले पितुराशिषं मे ॥ ८ ॥

समीर भो भोः प्रणमामि वै त्वां
सर्वोऽवसादो मम यातु दूरम् ।
सर्वत्र गात्रे करमर्शनेन
निधेहि भो भोः पितुराशिषं मे ॥ ९ ॥

मृत्से । नमस्तेऽस्तु नमो नमोऽस्तु
मनोऽभिलाषः सकलोऽस्तु पूर्णः ।
प्रपूर्य गेहं सकलं मदीयं
जागर्यतां तत्र पितुर्ममाशीः ॥ १० ॥

(४६)

निवेशितस्तेन सखेऽत्र कक्षे
क्रोड़ः स्वकीयो भवनेऽस्मदीये ।
यथा मनस्ते काङ्क्षति यत्नपूर्वं
तस्यासनं सज्जय कक्षमध्ये ।
गीतानि गायन्नुपजातहर्षः
सम्मार्जयात्रस्थितधूलिजालम् ।
अवस्करांश्चापि सखे गृहस्य
यत्नेन दूरीकुरु सत्वरं त्वम् ।
जलेन सिक्त्वा कुसुमानि भूय
आधारपूरं परितो निधेहि ॥ १ ॥

दिवा च नक्तं च स एव वन्धो
सन्तिष्ठतेऽस्मिन् भवनेऽस्मदीये ।
तस्यैव हासः पतति प्रकाम-
मालोकमालां विकिरन् प्रभाते ।
प्रत्यूषकाले च यदा प्रबुद्धा(:)
उन्मील्य नेत्रे ह्यवलोकयाम-
स्तदा निरीक्षामह एव सोऽसौ
स्मेराननः पश्यति नः सहर्षम्
तस्यैव लब्ध्वा वदनप्रसादं
सर्वो हि कक्षो भवति प्रपूर्णः ॥ २ ॥

एकोऽद्वितीयः सततं गृहेऽत्र
कक्षेऽस्मदीये ह्यवतिष्ठते सः ।
अन्यत्र कुत्रापि यदात्र लोके
कार्यानुरोधेन वयं प्रयामः
स द्वारदेशं स्वयमभ्युपेत्य
कार्येषु नः प्रेषयतीव नित्यम् ।
तदात्मसौख्यात् पथि धावमाना
हर्षेण गीतिं वयमाचरामः ।
समाप्तकार्या दिवसावसाने
गृहे निवृत्ता ह्यवलोकयामः—
स एकको वर्तत एव चास्मिन्
कक्षेऽस्मदीये प्रतिपालयन् नः ॥ ३ ॥

वयं यदा स्मः शयनेऽस्मदीये
प्रगाढसुप्ता हतचेतनाश्च ।
अस्माकमस्मिन् भवनस्य कक्षे
जाग्रत् स एको ह्यवतिष्ठते वै ।
जगत्तले कोऽपि न शक्त एव
द्रष्टुं तदीयं सुविगुप्तदीपम् ।
प्रच्छाद्य तं वै वसनाञ्चलेन
सर्वां स रात्रिं ज्वलयत्यमुं च ।
स्वप्नाः कियन्तो निशि सुप्तिमध्ये
तदात्र कुर्वन्ति गतागतं नः ।
घनान्धकारे स्थित एव सोऽत्र
कक्षेऽस्मदीये विदधाति हासम् ॥ ४ ॥

(५०)

मत्प्राणदेवो ननु यत्र देशे
सजागरो वर्तत एक एव ।
द्वारं तवोद्घाटय तत्र, भक्त,
यथास्य सन्दर्शनमद्य लप्स्ये ॥ १ ॥

भ्राम्यन् सदाहर्वहिरेव सर्वं
कमाप्तुमिच्छामि न वेद्मि तावत् ।
सायन्तनारात्रिकशिक्षणां मे
नाद्यापि यातं वत रे समाप्तिम् ॥ २ ॥

त्वज्जीवनालोकमतोऽधिगम्य
प्रज्वाल्य दीपं मम जीवनस्य
हे पूजकाहं निभृतं स्वमद्य
पूजार्थपात्रं किल सज्जयामि ॥ ३ ॥

यत्रार्चनालोकशिखा विधत्ते
तस्याखिलस्यैहिकसाधनं रे ।
तत्राहमेकामपि दीप्तिरेखां
यत्नेन नूनं ननु धारयिष्ये ॥ ४ ॥

(५१)

कयैव भासा ज्वलयन् स्वकीयं
प्राणप्रदीपं धरणीमुपैषि ।
भोः साधक, प्रेमिक, भोः प्रमत्त !
कथं वदाहो धरणीमुपैषि ॥ १ ॥

अकूलसंसार इहार्तिघातो
वीणानिनादं हृदि ते तनोति ।
कस्या हि घोरापदि वै जनन्या
दृष्ट्वास्य-हास्यं विदधासि हासम् ॥ २ ॥

कं मार्गयंस्त्वं निखिलं सुखं ते
दग्ध्वाग्निना भ्राम्यसि वेत्ति को वा ।
कृत्वा कुलं रोदयतीह कस्त्वां
प्रीतिर्विशेषा तव चास्ति यस्मिन् ॥ ३ ॥

न तेऽस्ति चिन्ता—प्रिय एव कस्ते
सखेति चित्ते ननु भावयामि ।
विस्मृत्य मृत्युं क्व वद ह्यनन्ते
प्राणाम्बुधौ संप्लवसे सहर्षम् ॥ ४ ॥

(५२)

आत्मीय एवासि समीपवासी
याचे तदाज्ञामिदमेव वक्तुम् ।
मत्सर्वहर्षस्त्वयि विद्यते च
याचे तदाज्ञामिदमेव वक्तुम् ॥ १ ॥

स्वरान् सुधाक्तानयि यच्छ मह्यं
गिरं मदीयां मधुरां कुरुष्व !
त्वत्तः प्रियो मे यत एव नास्ते
याचे तदाज्ञामिदमेव वक्तुम् ॥ २ ॥

सर्वं नभोऽदो धरणी तथैषा
त्वयैव पूर्णा ननु नित्यमस्ति
वाणीं ममैतां हृदयोत्थितां हे
वक्तुं तदाज्ञां पुनरेव याचे ॥ ३ ॥

विज्ञाय दुःखार्तमुपैषि पार्श्वं
क्षुद्रं च मत्वाद्रियसे सदा माम् ।
मत्क्षुद्रवक्त्रोत्थितवाचमेतां
वक्तुं प्रभो मेऽवसरं प्रदेहि ॥ ४ ॥

(५३)

नतं नतं मां कुरु, देवदेव,
नित्यं त्वदीये चरणारविन्दे ।
चित्तं मदीयं द्रवतां नयस्व,
संप्लावयाक्ष्णोः सलिले च जीवम् ॥ १ ॥

अस्म्येकलोऽहङ्कृति-तुङ्गशैले
प्रसह्य भङ्क्त्वा तु शिलासनं तत् ।
विलोठ्यतां धूलिनिकाय मध्ये—
नतं नतं मां कुरु पादपद्मे ॥ २ ॥

किं प्राप्य गर्वं श्वसिते नु मोघे—
शून्योऽस्मि पूर्णे भवने विना त्वाम् ।
मग्नं स्वगर्ते दिवसस्य कृत्यं,
मा सान्ध्यपूजा विफला तु मे भूत् ॥ ३ ॥

(५४)

गन्धाकुलेऽहं पवनेऽद्य कं वा
भ्रमामि सन्धाय वने वने रे ।
क्षुब्धेऽद्य नीले गगने किमेतद्
ध्वनत्यहो चञ्चल-रोदनं रे ॥ १ ॥

दूराद् दिगन्तात् करुणैकगीतं
मत्कृत्य-चिन्तासु लगत्युपेतम् ।
गन्धाकुलेऽहं पवनेऽद्य कं वा
मृग्यामि हा हन्त मनोऽन्तरे रे ॥ २ ॥

न वेद्मि कं नन्दनरागमाप्त्वा
जागर्ति रे यौवनकं सुखेप्सु ।
चूत-द्रुमानां मुकुलस्य गन्धे
सुमन्दशब्दे नवपल्लवानां,
तथाम्बरे चन्द्रसुधांशुसिक्ते,
नेत्राम्बुधारार्द्रमहाप्रमोदे,
स्पर्शेन कस्याजनि लोमहर्षो
ममाद्य गन्धाकुलवातमध्ये ॥ ३ ॥

(५५)

द्वारे वसन्तोऽद्य सजागरोऽस्ति ।

वगुन्विते ते श्वसिते सकुण्ठे
मा तं कुरुष्वाद्य सुवञ्चितं हे ।
उन्मील्यतां स्वं हृदयाब्जमद्य
विस्मर्यतामात्मपरप्रभेदः ॥ १ ॥

सङ्गीतमालामुखराम्वरे हे
वितन्यतां गन्ध-पयोधिभङ्गः ।
विकीर्यतां चैव वहिर्भवेऽत्र
माधुर्यभारान् सकलासु दिक्षु ॥ २ ॥

अतिप्रगाढ़ा खलु वेदना रे
रणत्यरण्ये प्रतिपल्लवेऽद्य ।
दूराम्वरे मार्गमुदीक्षमाना
कस्याकुला भूर्विदधाति सज्जाम् ।
आहन्ति वातो मलयाद्रिजन्मा
ममाद्य चित्तं मृदुमन्दगत्या ।
वाञ्छन् कमेष प्रतिगेहमित्वा
द्वारे विधत्ते करघातशब्दम् ।
गन्धोन्मदैषा रजनी च कस्य
जागर्ति पादे धरणीतले रे ।
भोः कान्त, भो वल्लभ, भो मनोज्ञ !
कमाह्वयस्यद्य सुमन्द्रमेवम् ॥ ३ ॥

(५६)

सिंहासनस्यानतोऽवतीर्य
समागतस्त्वं धरणीतलं हे ।
ततः प्रभो निर्जनसद्मनो मे
द्वारे स्थितोऽभूर्गमनं निरुध्य ॥ १ ॥

एको यदाहं मनसात्मनो हे
गीतानि गायन्नुपविष्ट आसम् ।
एषां स्वराः कर्णपथं गतास्ते—
त्वं मेऽप्युपेतो भवनं वतीर्य ॥ २ ॥

द्वारान्तिके निर्जनसद्मनो मे ।
प्रभो स्थितोऽभूर्गमनं निरुध्य ।
भवत्-सभायां कियदेव गीतं
सुगायका वा कति नाम सन्ति ।
गुणेन हीनस्य ममाद्य गीतं
प्रेम्ना तवैव ध्वनितं वताभूत् ॥ ३ ॥

त्वद्विश्वतानैः सह, नाथ, जात
एको विलग्नः करुणः स्वरः सः ।
आदाय हस्ते वरमाल्यमेकं
समागतोऽभूर्भुवनेऽवतीर्णः ॥ ४ ॥

(५७)

गृहाण मां नाथ, सदा गृहाण,
पराङ्मुखो मा भव साम्प्रतं हे ।
तिष्ठात्रचित्ते वलतोऽपहृत्य ।
दिनं गतं यद् रहितं त्वया मे
समर्पणं तस्य न कामयेऽहं—
तद् धूलिमध्ये प्रलयं प्रयातु ॥ १ ॥

वितत्य जीवं ह्यधुना दुग्रतौ ते
दिवन्दिवं जागरणां विधेयम् ।
कुतो हि भावाद्, वचसा च कस्य
कान्तारमार्गाब्धिनदीतटेषु
वृथाटग्रया मे गत एव कालः ।
उरःसमीपे वदनं ह्यदस्ते
रक्षन्निदानीं कथयात्मवृत्तम् ॥ २ ॥

कियन्मलं हे, कति विप्रलम्भा
मेऽद्यापि शिष्टा हृदयान्तराले ।
मा मां तदर्थं विमुखी कुरुष्व
तद्दोषराशिं दह वह्नियोगात् ॥ ३ ॥

(५८)

यदा प्रभो शुष्यति जीवनं मे
तदेहि वर्षन् करुणाम्वुधाराम् ।
सर्वा यदा लुम्पति माधुरीह
तदेहि गोतामृतवारिवर्षैः ॥ १ ॥

यदा च कर्म प्रवलं विगर्ज्य
दिशश्चतस्रो हि समावृणोति ।
हे मूकनाथ, प्रतिपत्स्व चित्तं
तदा प्रशान्तं दधदङ्घ्रिपातम् ॥ २ ॥

चेतो यदा स्वं कृपणां विधाय
कोणेऽनिशं तिष्ठति दीनहीनम् ।
मुक्त्वै हि मे द्वारमुदार नाथ,
राजाधिराजस्य सुडम्वरेण ॥ ३ ॥

अन्धं विधायामितधूलिजालैः
कामो यदा मोहयते ह्यबोधम् ।
हे पूत, हेऽनिद्र, तदा समेहि
रुद्रां द्युतिं ते परितो विकीर्य ॥ ४ ॥

(५६)

याचेऽधुना हे जगदेकनाथ,
विधेहि मूकं मुखरं कविं ते ।
तच्चित्तवंशीं बलतो गृहीत्वा
निनाद्यतां सा स्वयमेव मन्द्रम् ॥ १ ॥

प्रगाढ़रात्र्या निविड़स्वरेण
तानं च वंश्यां कुरु पूरितं हे ।
तानेन निर्वाक् विदधासि येन
स शीतरश्मिः सकला ग्रहाश्च ॥ २ ॥

यत् किञ्चिदास्ते भुवि मे विकीर्ण-
मितस्ततो हे श्वसिते मृतौ वा ।
गीतेस्तवाकर्षणतो मिलित्वा
तत् सर्वमागच्छतु तेऽङ्घ्रिपद्मम् ॥ ३ ॥

अह्नां बहूनां मम वाक्यराशि-
र्निमेषमात्रेण लयं प्रयाता ।
एको ह्यकूले तमसि प्रलीनः
श्रोष्यामि वंशीध्वनिमेव तेऽहम् ॥ ४ ॥

(६०)

विश्वं यदा तिष्ठति सुप्तिमग्नं
गाढ़ान्धकारावृतमम्बरं च ।
मदीयवीणागुणकर्षणेन
ददाति को झङ्कृतिमीदृशीं रे ॥ १ ॥

निद्रापयाता मम नेत्रयुग्मा-
दासे समुत्थाय विहाय तल्पम् ।
पश्यन् वितिष्ठे नयने विकाश्य,
तद्दर्शनं नो घटते तु हा मे ॥ २ ॥

गुञ्जद् विगुञ्जत् सततं मदीयं
चित्तं हि यातं परिपूर्णभावम् ।
जानामि नो का विपुला हि वाणी
पर्याकुलेन ध्वनति स्वरेण ॥ ३ ॥

न वेद्मि हा वेदनया कया रे
चित्तं प्रपूर्णं नयनाम्बुभारैः ।
इच्छामि तावत् प्रवलं प्रदातुं
कस्यैव कण्ठे मम कण्ठहारम् ॥ ४ ॥

(६१)

आगत्य पार्श्वं मम स न्यसीदत्
तथाप्यहं जागरिता न जाता ।
का कालनिद्रा कथय प्रपन्ना
हा त्वां तदा, भाग्यविड़म्बिते रे ॥ १ ॥

निःशब्दरात्रौ समुपस्थितः स
तस्यास्त हस्ते मधुरैकवीणा ।
प्रसुप्तिमध्ये ध्वनयन् प्रयातो
मन्द्रस्वनां काञ्चन रागिणीं सः ॥ २ ॥

यावत् प्रबुद्धा, समपश्यमग्रे
प्रवाति वातो मलयाद्रिजन्मा ।
उन्मादकस्तस्य सुगन्ध एव
भृत्वान्धकारं प्लवते समन्तात् ॥ ३ ॥

कथं मुधा मे रजनी प्रयाति
पार्श्वागतः किंसुलभो न पार्श्वे ।
स्पर्शोऽस्य किं वा करमालिकाया
वक्षोविलग्नोऽजनि मे न जातु ॥ ४ ॥

(६२)

श्रुतो न किं जातु तदङ्घ्रिशब्द
आयात्यसौ पश्य पुनः पुना रे ।
अहश्च रात्रिं च युगे युगेऽसौ
प्रतिक्षणं चैति जगत्तलं रे ॥ १ ॥

यावन्ति गीतानि यदा ह्यगायं
क्षौवेव लोको मनसा स्वकेन ।
तदेषु तस्यागति—गीतिरेका
स्वरैश्च सर्वैर्ध्वनिता बभूत् ॥ २ ॥

अनन्तकालात् स हि फाल्गुनाहे
वन्येन मार्गेण समेति लोकम् ।
कियन्नभस्यस्य घनान्धकारे
पयोदयानेन समेति वै सः ॥ ३ ॥

दुःखात् परं वै परमे हि दुःखे
वक्षो ममाहन्ति तदङ्घ्रिपद्मम् ।
प्राप्ते सुखे मर्शति वै कदाचित्
स्वपाणिना स्पर्शमणिं सयत्नम् ॥ ४ ॥

(६३)

कामं प्रकामं सविधे त्वदीये
पराजयोऽभून्मम नाम, देव ।
उपेक्षितुं त्वामवशं हि याव-
दात्मानमेवाहतवान् हि तावत् ॥ १ ॥

यत् कोऽपि चेतोगगनान्मदीयात्
प्रच्छाद्य रक्षिष्यति कामतस्त्वाम् ।
न सह्यमेतद् भवतः कथञ्चित्
पुनः पुनस्तद् विदितं मया हे ॥ २ ॥

सदा स्थितं सन्मम नाम पश्चा-
च्छायेव याति श्वसितं व्यतीतम् ।
विचित्रमायामयवेणुनादै-
र्ममाह्वयत्येव मुधा च नित्यम् ॥ ३ ॥

मैत्रं च तेन त्रुटितं ममाद्य,
बद्धोऽस्मि हस्ते तव नाम, देव ।
यत् किञ्चिदास्ते श्वसिते ममास्मिन्
द्वारं तवानायि तदेव सर्वम् ॥ ४ ॥

(६४)

एकैकशो मुञ्च पुराणतन्त्रीः
स्वरैश्च नूत्नैर्निवधान यन्त्रम् ।

गता समाप्तिं दिवसस्य मेला
प्रक्रंस्यते सान्ध्यसभाधुना हे ।
अन्त्यः स्वरो येन निनादनीय-
स्तस्यागतेः काल उपस्थितो हे ॥ १ ॥

द्वारं प्रभो ते कुरु पूर्णमुक्तं
गाढ़ान्धकाराच्छदिताम्वरस्थम् ।
तत् सप्तलोक्याश्चिरनीरवत्वं
प्रवेशमाप्नोतु तवैव कक्षे ॥ २ ॥

त्वया पुरा यत् कृतमेव गीतं
तस्यावसानं भवतादिदानीम् ।
इदं हि यन्त्रं तव नाम यन्त्रं—
विस्मर्यते नाम कथं कथेयम् ॥
स्वरैर्नवीनैर्निवधान यन्त्रम् ॥ ३ ॥

(६५)

निधाय कण्ठे तव गीतिमाल्यं
कदा न जाने वहिरागतोऽहम्
—न ह्यद्य, न ह्यः, स तु काल एव ॥ १ ॥

कदा प्रभृत्येव समागतोऽस्मि
त्वां प्राप्तुकामो—न हि तत् स्मरामि
—न ह्यद्य, न ह्यः, स तु काल एव ॥ २ ॥

कस्येप्सया तन्न विजानती सा
यथायते निर्झरिणी वहिस्तः ।
धावंस्तथायां श्वसित प्रवाहे
—न ह्यद्य, न ह्यः, स तु काल एव ॥ ३ ॥

समाह्वयं तं कति-नामभिर्वे,
चित्राणि हा हा कति चाङ्कितानि ।
अप्राप्य तस्यालयसङ्केतं च
कया मुदायामि न वेद्मि तावत् ॥
—न ह्यद्य, न ह्यः, स तु काल एव ॥ ४ ॥

आलोकमाप्तुं सकलत्रियामां
जागर्ति पुष्पं हि यथा न जानत् ।
तथैव नित्यं हृदयं मदीयं
प्रतीक्षया ते परिपूर्णमास्ते ॥
—न ह्यद्य, न ह्यः, स तु काल एव ॥ ५ ॥

(६६)

त्वत्प्रेम वोढुं न हि मेऽस्ति शक्तिः ।
अतो भवेऽस्मिन् कृपया न्यधत्था
मध्ये हि ते मे व्यवधानजातम्-
सदो यशोवित्तजनादिरूपाः
सुखासुखस्यैव वृतीः प्रभूताः ॥ १ ॥

क्षणे क्षणे नाथ तवान्तराल-
स्थितस्य दृष्टिं समवैमि दभ्राम् ।
कृष्णाभ्रमालान्तरनिःसरन्तीं
भानोः सुमन्दामिव रश्मिरेखाम् ॥ २ ॥

ददासि यस्मै भुवने ह्यसीम-
त्वत् प्रेमभारोद्वहनाय शक्तिम् ।
अपाकरोषि प्रसभं त्वदीयं
प्रावारवस्त्रं सकलं चिराय ॥ ३ ॥

न गेहवासं न च वित्तलेशं
तस्य प्रभो संसहसे कथञ्चित् ।
आनीय मार्गं ह्यथ वीतशेष-
मकिञ्चनं तं कुरुषे प्रकामम् ॥ ४ ॥

मानावमानावपि भीतिलज्जे
न सन्ति तस्यात्र मुहूर्तमात्रम् ।
एकोऽद्वितीयः प्रतिभासि तस्य
त्वमेव सर्वं भुवने समग्रे ॥ ५ ॥

परस्परास्य-प्रविलोकनेन
पुरःस्थितिस्ते वत नित्यमित्थम्,
त्वय्येव मग्नस्य तथैकमात्रं
स्वप्राणपूर्ति-प्रतिपादनं च—

एषा कृपा येन गतेहलोके [गता = प्राप्ता]
लोभस्य तस्यावधिरेव नास्ते ।
तुभ्यं पदं दातुमपाकरोति
लोभं तु सर्वं भुवनस्थितं सः ॥ ६-७ ॥

(६७)

प्रभातकालेऽद्य सुरक्तवर्णं
त्वं पारिजातं परिगृह्य हस्ते ।
हे सौममूर्ते ! समुपस्थितोऽभूः ॥ १ ॥

प्रसुप्तपुर्याः पथि नास्त पान्थ
एको ह्यगाः स्वेन रथेन हेम्नः ।
रुद्ध्वा गतिं स्वां तु सकृद् गवाक्षे
कृतस्त्वयाहो करुणाक्षिपातः ॥ २ ॥

स्वप्नो हि पूर्णो मम कैश्च गन्धैः
सदस्तमोऽकम्पत कैश्च हर्षैः ।
निःशब्दवीणा भुवि लुण्ठिता मे
दध्वान घातैरहतैश्च कैर्वा ॥ ३ ॥

चिन्ता प्रबोधे कतिकृत्व आसीद्
विहाय जाड्यं गमनाय मार्गें।
यदोत्थितोऽहं गत एव हा त्वं
त्वया न मन्ये पुनरीक्षणं स्यात्॥

प्रभातकाले नवरागरक्ते
हे सौममूर्ते! सुमपस्थितोऽभूः॥ ४॥

(६८)

क्रीड़ा त्वया सार्धमभूद् यदा मे
'कस्त्वं' तदैतद् भुवि कः स्म वेद।
चित्ते भयं नास्त, न चापि लज्जा
प्रायादशान्तः श्वसित-प्रवाहः॥ १॥

प्रत्यूषसि त्वं कति मा जुहाव
निजः सखेव प्रणयेन बद्धः।
धावन् हसित्वा मिलितस्त्वयाहं
कत्यभ्रमं नाम वने वनान्ते॥ २॥

गीतानि यान्येव तदा जगाथ
केनैव तेषां विदितस्तदार्थः।
एकं मनो मे विजगौ समं तै-
र्नंनर्तं हृष्टं च सदा ह्यशान्तम्॥ ३॥

ईक्षे दिनान्तेऽद्य किमत्र चित्रं—
स्तब्धं नभश्चन्द्ररवी च मूकौ।
कृत्वा नतं स्वं नयनं पद्मे ते
सन्तिष्ठते नोऽवनिरेकपार्श्वे॥ ४॥

(६९)

असौ तरीर्याति विमुक्तबन्धा-
भारस्तवोद्धृत्य कया नु नेयः ? ॥ १ ॥

पुरःप्रदेशो यदि नाम गम्यः
पृष्ठे हि ते तिष्ठतु पृष्ठ भागः ।
पृष्ठेन वोढुं गत एव यत् त्व-
मेको हि तस्मात् स्थित एव कूले ॥ २ ॥

आकर्षमाकर्षमगार भारो
नीत्वा त्वया न्यास्यत पारघट्टे ।
प्रत्यागतिस्तेन पुनः पुनस्ते
जातेति किं ते स्मरणाद्विलुप्तम् ॥ ३ ॥

समाह्वय त्वं तरिकर्णधारं
भारस्तवाहो प्लवमान एतु ।
रिक्तं विधाय श्वसितं स्वकीयं
समर्प्यतां तद्धि तदङ्घ्रिमूले ॥ ४ ॥

(७०)

अदृश्यतां मे गतमद्य चित्तं
मेघान्तराले गगनस्य मध्ये
किं लक्ष्यमुद्दिश्य कमेव देशं
प्रयाति धावन्न हि वेत्ति कोऽपि ॥ १ ॥

क्षणप्रभाहन्ति पुनः पुना रे
तद्वीणिकायाः सकला हि तन्त्रीः।
दम्भोलिघोषो ध्वनति प्रकामं
तानेन तस्योरसि तीव्रकेन ॥ २ ॥

भारैश्च भारैर्विततं समन्तात्
सुनील-गाढ़ं तिमिरं सपुञ्जम्।
आवेष्ट्य सम्यक् सकलं मे गात्रं
ततान चित्तेऽप्स्विव तैलविन्दुः ॥ ३ ॥

उद्दामनृत्यः पवनः प्रमत्तो
जातः सहायो मम सङ्गमाप्तः।
निषेध वाक्येष्वविदत्तकर्णः
कृत्वाट्टहासं क्व नु धावते सः ॥ ४ ॥

(७१)

हे मौन ! निर्वाक्स्थितिरिष्यते चे-
न्न कथ्यतां तर्हि वचस्त्वयैकम्।
आपूर्य वक्षः सततं वहामि
तामेव ते नीरवतां स्वयं हे ॥ १ ॥

प्रज्वल्य ताराः पलकैर्विहीना
धैर्येण नम्रा तव पादमूले।
रात्रिर्यथा तिष्ठति नित्यमूका
स्तब्धो वितिष्ठे हि पुरा तथाहम् ॥ २ ॥

[पुरा वितिष्ठे = स्थास्यामि]

नूनं हि नूनं भविता प्रभातो
दूरेऽपयाता च निशातमिस्रा ।
वाणी तवैवेव सुवर्णधारा
नभो विदीर्य प्रपतिष्यतीह ॥ ३ ॥

किं हे तदानीं तव भाषया मे
खगस्य नीड़े स्वनिता स्वगीतम् ।
तानेन ते वै मम वन्यवल्ली
पुष्पाणि किं स्फोटयिता प्रकामम् ॥ ४ ॥

(७२)

दीपं समिन्धे यति नाम वारान्
निर्वाणमायाति ततीह वारान् ।
तवासनं मे श्वसितेऽत्र, नाथ,
सदा स्थितं वै तमसि प्रगाढ़े ॥ १ ॥

लतास्ति या, सा तु विशुष्कमूला
न स्फुटपुष्पा वहुकुट्मलापि ।
सेवा तवातः श्वसिते मदीये
स्यादेव दुःखैरुपहारभूतैः ॥ २ ॥

त्वदर्चना गौरवमस्ति नो मे,
न पुण्यरूपो विभवश्च दभ्रः ।
एषोऽर्चनार्थी परिधाय दीनं
लज्जा-पिधानं समुपस्थितोऽद्य ॥ ३ ॥

तस्योत्सवे नागत एव कोऽपि
वंशीध्वनिर्नास्त, न गेहसज्जा ।
क्रन्दन् समाहूय समानयत् त्वां
द्वारं स भग्नं निजमन्दिरस्य ॥ ४ ॥

(७३)

त्वां सर्वलोकादपसार्य, नाथ
रक्षामि कुत्रापि रहःप्रदेशे ।
त्वदर्चनायोग्यमियत्प्रकारं
कक्षं लभेयं भवनेऽत्र कुत्र ॥ १ ॥

नक्तन्दिवं मे यदि दृश्यतां हे
प्रयासि सर्वैः स्वजनैश्च सार्धं ।
कृपां तवैतामधिगम्य, नाथ,
करोमि हे त्वां हृदि दृढ़वद्धम् ॥ २ ॥

ददामि मानं भवते प्रभो य-
न्न तादृशोऽहं स्वयमेव मानी ।
पूजां तवाहं विदधामि हे य-
दायोजनं तस्य न वर्तते मे ॥ ३ ॥

प्रीतिर्ममास्ते यदि हे प्रति त्वां
वंशी मदीया मुखरा स्वयं स्यात् ।
वने वने यास्यति पुष्पमाला
स्वयं विकाशं प्रसभं समन्तात् ॥ ४ ॥

(७४)

वंशी-स्वरस्ते ध्वनतीह वज्रे-
साधारणं किं हि तदेव गीतम्।
जागर्मि तेनैव यथा स्वरेण
कर्णौ तथा मे सदयं प्रदेहि ॥ १ ॥

नाल्पेन भूयो ननु विस्मरेयम्—
प्रच्छन्न आस्ते मरणस्य मध्ये।
प्राणो हि नित्यं भुवि योऽन्तहीनः
तस्मिन् मनो मे भविता प्रमत्तम् ॥ २ ॥

वात्या हि सा मे सुमुदास्तु सह्या
स्वचित्तवीणान्तरवर्तितन्त्र्याम्।
त्वं सप्त सिन्धून् दश वै दिगन्तान्
झङ्कारतो नर्तयसे च येन ॥ ३ ॥

विच्छिद्य मां हे सुखभोगसङ्गाद्
देशं गभीरं नय तं हि यत्र।
अशान्तिमध्ये चिरजागरूका
विराजते वै महती प्रशान्तिः ॥ ४ ॥

(७५)

प्रक्षाल्यतां मे श्वसितं त्वया हे,
कृपाम्बुधारा-परिषेचनेन।
नोचेत् समर्थो भुवने भवेयं
स्प्रष्टुं कथं ते चरणारविन्दम् ॥ १ ॥

पूजार्घ्यदानाय समागतस्य
स्फुरन्ति सर्वे मम कालिमानः ।
प्राणानतस्ते चरणे निधातुं
न, देवदेव, प्रभवामि जातु ॥ २ ॥

नासीदियन्तं समयं हि यावद्
व्यथाऽन्तरे काचन मे भवेऽस्मिन् ।
अङ्गानि सर्वाणि ममैव चासन्
मालिन्यलिप्तानि परं समन्तात् ॥ ३ ॥

अदःसिताङ्कस्य कृते तवैव
विरौति चित्तं परमं ममाद्य ।
मा मा कृपालो सदयं सहस्व
तस्याद्य धूलौ शयनं पुनश्च ॥ ४ ॥

(७६)

अहो गतायां समितौ समाप्तिं
गायन्नयिष्ये नु किमन्त्यगीतम् ।
मन्ये तदाहं हृतकण्ठवृत्तिः
स्थास्यामि वक्त्रं प्रति बद्धदृष्टिः ॥ १ ॥

स्वरो न लग्नो ह्यधुनापि यत्र
शब्दायिता स्यात् किमु रागिणी सा ।
प्रेमव्यथा किं हि सुवर्णतानैः
पुरावृणोत्येव नभश्च सान्ध्यम् ॥ २ ॥

इयन्ति वर्षाणि दिवानिशं मे
स्वचेतसा या स्वरसाधनासीत् ।
भाग्येन सा चेदधुना हि, नाथ,
गच्छेत् समाप्तिं श्वसिते मदीये ।
तदास्य पूर्णां श्वसितस्य वाणीं
मदीयचेतोवनपद्मखण्डम् ।
संप्लावयिष्येऽन्तिमसागरापे
प्रवाह्य विश्वानुग-गीतधाराम् ॥ ३-४ ॥

(७७)

त्वं वेदना मे चिरजन्मनो हे ।
त्वं साधना मे चिरजन्मनो हे ॥ १ ॥

तवानलः सञ्ज्वलतु प्रकामं
कृपां कृथा मा मम दुर्बलत्वात् ।
इच्छामि सोढुं सकलाप्ततापं
भस्मास्तु दग्धाखिलवासना मे ॥ २ ॥

अमोघमाह्वानमुपैतु तेऽद्य
कथं वृथा कालविलम्बनं हे ।
आवेष्ट्य वक्षो य इहास्ति बन्ध-
श्छिन्नः स पश्चान्निपतत्विदानीम् ॥ ३ ॥

गर्जन्निदानीं तव मन्त्र-शङ्खः
पुनश्च भूयो ध्वनतु प्रकामम् ।
छित्त्वा स्वगर्वं, स्वपनं विहाय
जागर्तु तीव्रा मम चेतनाद्य ॥ ४ ॥

(७८)

गातुं यदाज्ञा तव मामुपैति
गर्वेण वक्षः परिपूर्यते मे ।
अक्षिद्वयं त्वन्मुखबद्धदृष्टि
भवत्यहो निर्निमिषं जलार्द्रम् ॥ १ ॥

कठोरतिक्तं हृदि विद्यते यद्
गीतामृते वाञ्छति तद् द्रवत्वम् ।
आराधनं मेऽखिलसाधनं च
पक्षीव वष्टुत्पतितुं सुखेन ॥ २ ॥

तृप्तोऽसि नित्यं मम गीतरागै-
रेते च तुभ्यं नियतं स्वदन्ते ।
अस्यैव गीतस्य बलेन, जाने
गत्वा निषीदामि पुरस्तदीये ॥ ३ ॥

यदास्पदं नो मनसाधिगम्यं
स्पृशाम्यहं तौ चरणौ स्वगीतैः ।
स्वरस्य मोहाद् विगतात्मबोधः
समाह्वयामि प्रभुमेव बन्धुम् ॥ ४ ॥

(७९)

प्रधावतु त्वां प्रति, देवदेव
ममाखिलो वै प्रणयः सदैव ।
कर्णौ त्वदीयौ प्रविशन्त्वशेषा (:)
आशा गभीरा, मम चेतसोऽपि ॥ १ ॥

सन्तिष्ठते यत्र यदा च चित्तं
त्वदाह्वयेनास्तु सदोन्मुखं तत् ।
बाधाश्च सर्वास्त्रुटिता भवन्तु
त्वदीयमाकर्षणमेव लब्ध्वा ॥ २ ॥

मद्वाह्यभिक्षापरिपूर्णपात्रं
निःशेषरिक्तं भवतादिदानीम् ।
किन्त्वन्तरं मे भवतु प्रपूर्णं
तवैव दानेन सदा सुगुप्तम् ॥ ३ ॥

हे प्राणबन्धो परसन्निकृष्ट !
यज्जीवनेऽस्ति प्रियसुन्दरं मे ।
तदेव सर्वं स्वरपूर्णमस्तु
गानेन ते हे रणितं भवच्च ॥ ४ ॥

(८०)

समागतास्ते दिवसे गृहं मे
प्रोचुश्च "तिष्ठाम इहैकपार्श्वे" ॥ १ ॥

प्रोचुश्च भूयः "शृणु, ते सहायाः
देवार्चनायां सततं भवामः ।
लभ्यो हि·यः कश्चिदिह प्रसादः
पूजावसाने स हि सेवनीयः ॥" २ ॥

उक्त्वेति दीना लघुदेहभारा
वासो वसाना मलिनं ततस्ते ।
सङ्कोचमाश्रित्य गृहं प्रविश्य
वितष्ठिरे मूकमथैककोणे ॥ ३ ॥

पश्यामि रात्रौ प्रबलाः प्रवृद्धा
देवालयं ते मम संप्रविश्य ।
मलाक्तहस्तेन हरन्ति तस्मात्
पूजोपहारं सकलं मदीयम् ॥ ४ ॥

(८१)

ते वाटमध्यं समुपेत्य लोका
गृह्णन्ति शुल्कं तव, नाथ, नाम्ना ।
पश्चाद् यदान्ते गत एव घट्टं
पश्यामि नास्ते स हि पारशुल्कः ॥ १ ॥

त्वदीयकार्यव्यपदेशत स्ते
धनान्यसूंश्चैव विनाशयन्ति ।
स्वल्पं यदेवास्ति मदन्तिके हा
गृह्णन्ति से तत् किल दस्युवृत्त्या ॥ २ ॥

स छद्मवेशावृतलोकसङ्घो
मयाद्य सम्यक् परिचीयते स्म ।
शक्त्या विहीनोऽयमितीव बुद्ध्या
तेनाप्यहं हा विदितः प्रकामम् ॥ ३ ॥

अपेतलज्जैरत एव हा तै-
र्लोकैर्विसृष्टा स्वकगुप्तमूर्तिः ।
ततः सगर्वं शिर उन्नमय्य
रुद्ध्वाद्य मार्गं स्थितमेव तत्र ॥ ४ ॥

(८२)

जागर्ति चित्तं निशि पौर्णमास्यां
स्थानं भवेत् किं तव पार्श्वतोऽद्य ? १ ॥

द्रष्टुं ह्यलं स्यां तदपूर्ववक्त्रं,
स्थाता च पश्यद् हृदयं समुत्कम् ।
आवेष्ट्य पादौ च पुनः पुनस्ते
मत्-साश्रु-गीतं विचरिष्यतीह ॥ २ ॥

ससाहसं तेऽद्य पदाब्जमूले
कृतं मया नात्मसमर्पणं हे ।
प्रत्यर्पितं स्याद् यदि मे हि दान-
मिति स्थितोऽस्मि क्षितिलग्नवक्त्रः ॥ ३ ॥

पार्श्वागतश्चेद् धृतमत्करस्त्व-
मुत्तिष्ठ वत्सेति वदेः स्वयं मे ।
असीमदैन्यं मम चित्तवर्ति
सद्योऽवसानं निमिषेण याता ॥ ४ ॥

(८३)

आसीत् कथैषा—त्वमहं निरर्थं
प्लवावहे केवलमेकनावा
न ज्ञास्यते कोऽपि तथा त्रिलोक्यां
क्वास्मदृद्वयं गच्छति तीर्थयात्रि ॥ १ ॥

तस्मिन्नकूले जलधौ स्थितेन
श्राव्यो मया त्वं श्रुतिगम्यगीतम् ।
वाग्बन्धहीना लहरीव गीतिः
श्रव्या त्वया सा हसतापि तूष्णीम् ॥

अद्यापि नो किं समयोऽभवत् ते ?
किमस्ति शिष्टं तव नाम कार्यम् ? २ ॥

सन्ध्यावतीर्णा जलधेस्तटेऽसौ—
प्रसार्य पक्षौ मलिनार्कदीप्तौ
ते सिन्धु-पारं विगताः खगाश्च
प्रत्यागताः स्व-स्व-कुलायमध्यम् ॥ ३ ॥

कदाब्धिघट्टं समुपैष्यसि त्वं
विच्छेत्तुमस्मत्तरिबन्धनं हे ।
कदास्तभानोरिव शेषरश्मि-
स्तरीर्निशीथे भविता विलीना ॥ ४ ॥

(८४)

मदेक गेहव्यवधानभित्तिं
भित्त्वा कदादोभुवने विशाले ।
मनोरथस्येव रथेन, नाथ
शक्ष्यामि गन्तुं बहिरेव गेहात् ॥ १ ॥

सर्वस्य मध्ये प्रबलानुरागाद्
धावन् भ्रमिष्याम्यखिले स्वकार्ये ।
हट्टस्य मार्गे हि समं त्वया हे
सम्मेलनं मे भवितैव नूनम् ॥ २ ॥

आशाभिलाष प्रचयानुविद्धे
संसारसिन्धौ सुखदुःखरूपे ।
प्रदाय झम्पं ननु धारयिष्ये
तरङ्गपातं मम वत्स मध्ये ॥ ३ ॥

शुभाशुभानामभिघात वेगात्
प्रजागरिष्यामि तवैव वत्से ।
धराजनानां कलशब्दमध्ये
श्रोष्यामि वाणीं सततं त्वदीयाम् ॥ ४ ॥

(८५)

एकोऽहमेवं न पुनर्भ्रमामि
चेतोऽन्तरे मोहवशं गतः सन् ॥ १ ॥

एको यदा त्वां भुज वन्धनेन
क्षुद्रं च कृत्वा गत एव वन्धुम् ।
आत्मानमेकं हि तदा न्यवध्नां
मूर्खो यतोऽहं निजया च रज्ज्वा ॥ २ ॥

लप्स्ये यदाहं, जगदेक नाथ,
त्वामत्र लोके निखिलस्य मध्ये ।
तदैव नूनं हृदये स्वकीये
मयाप्स्यते वै हृदयाधिराजः ॥ ३ ॥

चित्तं हि वृन्तो मम केवलं हे
तदूर्ध्वमास्ते स्फुट-विश्वपद्मम् ।
तस्योपरि त्वं स्थित एव मह्यं
पूर्णं हि ते दर्शयसि प्रकाशम् ॥ ४ ॥

(८६)

यद्यद्य, नाथ, प्रसभं कृतो मे
प्रजागरस्तर्हि न याहि भूयः ।
निवृत्य मा गा, विमुखश्च मा भूः
कुरु प्रकामं करुणाद्विपातम् ॥ १ ॥

आषाढ़मेघो विदधाति वर्षं
वने प्रगाढ़े घनशाखिशीर्षे ।
वर्षाम्बुपूर्णाऽलसतामुपेत्य
विभावरी तिष्ठति सुप्तिमग्ना ॥ २ ॥

विरामहीनाशनिघातभीतं
चित्तं मदीयं सततं विनिद्रम् ।
वर्षापधारानिकरैः समं च
गीतानि गांतुं कुरुतेऽभिलाषम् ॥ ३ ॥

मनस्तदा मे नयनाम्बुमध्ये
तमस्तले वै वहिरागतं सत् ।
प्रसार्य वाहुद्वयमेव शक्त्या
समाकुलं मृग्यति खं विलुप्तम् ॥ ४ ॥

(८७)

छित्वा प्रभो मां सदयं गृहाण
कार्या न भूयोऽधिककालहानिः ।
पतामि चेद् वै स्खलितोऽत्रधूलौ
भीतिर्ममैषा सततं वर्तास्ते ॥ १ ॥

किं पुष्पमेतत् तव माल्यमध्ये
स्थानं लभेतेति न वेद्मि सम्यक् ।
तथापि ते छेदनघातदुःखं
भाग्येन तस्य प्रतिपन्नमस्तु ॥ २ ॥

मां छिन्धि तद् भो अधुनैव नाथ
कृतं कृतं कालविलम्बनेन ।

कदा दिनं यास्यति सायमत्र [सायम् = अवसानम्]
कदान्धकारो भविता च भूयः ।
कदा च कालस्तव पूजनस्य
यास्यत्यलक्ष्यं नहि वेद्मि तच्च ॥ ३ ॥

यावांश्च वर्णः स्फुट एव गात्रे
यावांश्च गन्धो, मधु यावदेव ।
स्वस्यैव भोगाय गृहाण तावत्
तस्मिन् सुकाले सति वर्तमाने ॥ ४ ॥

(८८)

त्वामाप्तुमिच्छामि, न किञ्चिदन्यत्
त्वामाप्तुमिच्छामि— वदामि भूयः ।
वचो ममैतन्मनसा प्रवक्तुं
प्रभो सदा मेऽवसरं प्रदेहि ॥ १ ॥

या काचिदन्या हृदि कामनास्ते
यस्याः कृतेऽटग्र रजनौ दिवा मे ।
सा नाम मिथ्या, शृणु, सा हि मिथ्या
त्वां प्राप्तुमिच्छामि, न किञ्चिदन्यत् ॥ २ ॥

रात्रिर्यथा गूहति वत्समध्य
आलोकमालार्थितमेव सर्वम् ।
तथा हि चाहं घनमोहमध्ये
त्वामाप्तुमिच्छामि सदा च, नाथ ॥ ३ ॥

आहन्ति शान्ति झटिका यदैव
तदापि शान्ति हृदि वाञ्छतीयम् ।
आहन्मि तद्वन्नियतं प्रभो त्वां
त्वामाप्तुमिच्छामि तथापि नित्यम् ॥ ४ ॥

(८६)

इदं मम प्रेम न भीरु जातु
न चापि शक्त्या रहितं कदापि ।
समाकुलं सत् किमु नाम तद्धि
करिष्यते केवलमश्रुपातम् ॥ १ ॥

शोभा सुखं का-मधुरे विधत्तः
कथं हि तत् प्रेम सुषुप्तिमग्नम् ।
हर्षेण मत्तं तु समं त्वयैतत्
प्रजागरं काङ्क्षति नित्यमेव ॥ २ ॥

करोषि नृत्यं धृतभीमकेशो
यदास्य मामर्दति तीव्रतालः ।
पलायते प्रेम तदा भयेन
ह्रिया च सन्देहसमाकुलं सत् ॥ ३ ॥

त्वां चण्डमूर्ति भृशसुन्दरं च
वृणोतु मे प्रेम—मतिर्ममैषा ।
तच्चाधमाशात्रिदिवं हि स्वस्य
रसातलं प्रापयतु प्रकामम् ॥ ४ ॥

(९०)

सह्यो मयाघात इतोऽधिक हे
सह्यः स नूनं कथयामि भूयः ।
झङ्कारमुत्थापय जीवतन्त्र्यां
स्वरैरपूर्वैरधिकं कठोरैः ॥ १ ॥

यमेव रागं जनयस्यहो मे
चित्ते, न तानैर्ध्वनिताऽन्तिमैः सः ।
कठोरया मूर्छनया हि तत्र
गाने च सञ्चारय पूर्णमूर्तिम् ॥ २ ॥

सुकोमला ते करुणा विलग्ना
न जायतां मे हृदि केवला वै ।
मृदुस्वरक्रीड़नया ममैतद्
व्यर्थं न चित्तं कुरु जातु, नाथ ॥ ३ ॥

सर्वे हुताशाः परितो ज्वलन्तु,
गर्जन्तु सर्वे मरुतश्च दिक्षु ।
सर्वं नभो जागरितं विधाय
विस्तीर्यतां तत्परिपूर्णता हे ॥ ४ ॥

(९१)

इदं त्वया निष्ठुर हे, कृतं यत्
तदेव सर्वं ननु साधु साधु ।
ईदृक्तया मे हृदये त्वयाद्य
प्रज्वल्यतां तीव्रहुताशनो हे ॥ १ ॥

अस्मिन्नदग्धे मम नाम धूपे
गन्धो न कश्चिद् वहिरेति तस्मात् ।
अयं प्रदीपोऽज्वलितो न दत्ते
प्रभां च दभ्रामपि गेह-मध्ये ॥ २ ॥

यदैव चित्तं तमसि प्रलीन-
मचेतनं तिष्ठति मामकीनम् ।
आघात एवात्र स ते हि नाथ
त्वत्स्पर्शहेतोस्तु पुरस्कृति मे ॥ ३ ॥

तमस्-त्रपा-मोहवशं गतः सन्
पश्यामि न त्वां नयनेन, नाथ ।
अङ्गारभूतं यदिहास्ति कृष्णं
वज्रेन ते भो नय वह्नितां तत् ॥ ४ ॥

(९२)

त्वं देवतेति स्थित एव दूरे
न ज्ञातिरित्यादृत एव नाभूः ।
पितेति पादे विहितः प्रणामः
सखेति मत्वा न धृतस्तु हस्ते ॥ १ ॥

स्वयं निसर्गप्रणयेन यत्र
भूत्वा मदीयो ह्यवतीर्ण एव ।
त्वं तत्र सौख्यात् परिगृह्य वत्से
सङ्गीति मत्वा न वृतो मयाभूः ॥ २ ॥

भ्रातासि हे भ्रातृगणस्य मध्ये
तथापि तत्र प्रहिता न दृष्टिः ।
तेनापि सार्धं विभवं विभज्य
कृता न मुष्टिस्तव, नाथ, पूर्णा ॥ ३ ॥

सर्वस्य गत्वा सुखदुःखमध्ये
न ते पुरस्तात् स्थित एव जातु ।
अक्लान्तितः कर्मसु दत्तचित्तो
न प्राणसिन्धौ पतितो विलम्प्य ॥ ४ ॥

(६३)

स्वकर्ममध्ये किमु मां प्रभो न
नियोजयिष्यस्यधुनापि लोके ।
दिनेषु कृतेः स्वकरेण किं मा- [कृते = कार्यस्य]
मागत्य नो जागरयिष्यसि त्वम् ॥ १ ॥

शुभाशुभे सम्पतनोत्थितौ च
त्वद्विश्वशाला-कृतिनाशकृत्ये ।
पार्श्वस्थितेनैव भवत्वशेषो
मयाधिगम्यस्तव संस्तवश्च ॥ २ ॥

व्यचिन्ति, देशे विजने विरोध्रे
गतागतं यत्र न विद्यते हे ।
सायंक्षणे सङ्गतयोर्भवेत्सौ
परस्पर-ज्ञानमशेष रूपम् ॥ ३ ॥

तमोऽन्तरे चैककयोस्तदेव
सन्दर्शनं स्वप्नवलोकनं वे ।
मामाह्वय त्वं स्वकहट्टमध्ये
यत्रानिशं स्तः क्रयविक्रयौ हे ॥ ४ ॥

(९४)

विश्वेन युक्तो भ्रमसीह यत्र
त्वया समं तत्र ममापि योगः ।
नो वा वने, नो विजनास्पदे वा,
ममापि नो वा स्वकचित्तमध्ये ।
सर्वस्य यत्र स्वजनः प्रियासि [प्रियः असि]
ममापि तत्र स्वजन स्त्वमेव ॥ १ ॥

प्रसार्यते दोः प्रति यत्र सर्वं
तत्रैव मे प्रेम भवेत् प्रबुद्धम् ।
न तिष्ठति प्रेम गृहे सुगुप्तं
कीर्यं भवत्यत्र यथार्करश्मिः ।
सर्वस्य चानन्दकरं, प्रिय, त्व-
मानन्दनं नाम तवैव मेऽपि ॥ २ ॥

(९५)

सुस्निग्ध-शीते सुगभीर-पूते
तवान्धकारे वितते समन्तात् ।
समाह्वय त्वं सततं हि मां हे
समाह्वय त्वं सततं हि मां हे ॥ १ ॥

ग्लानिक्रमौ तो दिवसस्य तुच्छौ
मज्जीवनं हे क्षिपतोऽत्र धूलौ ।
सर्वक्षणं व्याप्य सुसञ्चिते च
वाकस्य चित्तस्य विकारराशौ ॥ २ ॥

तवान्धकारे निविड़े ह्युदारे
रवेन हीनेऽवधिना च शून्ये ।
मुक्तं कुरु त्वं, कुरु मां विमुक्तं—
ममार्थनैषा तव पादपद्मे ॥ ३ ॥

निःशब्दरात्रौ हृतवाग्विभूति
वहिर्मदीयं वहिरेव यातु ।
अन्तर्गुहायां स्थित एव यो मे
सोऽश्वखण्डलेख ददातु दृष्टिम् ॥ ४ ॥

(९६)

यत्रास्ति ते सुरुठनमत्र लोके
तत्र प्रयाता नु कथं मनो मे ।
गृह्णन्ति हैमैः कलशैः समन्ता-
दालोकधारा रवितारका वै ।
प्राणा ह्यनन्ता वितता हि यत्र
तत्र प्रयाता नु कथं मनो मे ॥ १ ॥

दानासने यत्र निषीदसि त्वं
तत्र प्रयाता नु कथं मनो मे ।
यत्रानिशं नूतनरसं निपात्य
प्रसारयस्येव निजं नु, तत्र
नामन्त्रणं स्यात् किमु जीवने मे ?
तत्र प्रयाता नु कथं मनो मे ॥ २ ॥

(६७)

स्वयं यथा त्वं नयसे विकाशं
पुष्पं तथैवं, मम कण्ठगीतम् ।
हे प्राणवन्धो, मम चित्तनाथ,
तवैव दानं परमं वतेष्य ॥ १ ॥

तत्पुष्प-दृष्ट्या मम नाम चित्त-
मानन्दसिन्धौ प्लवते वगाह्य ।
ममेति मत्वा तव सन्निकर्षं
तच्चोपहर्तुं समुपैमि नाम ॥ २ ॥

स्निग्धं हसित्वा स्वकरेण जोष-
मादाय मत्तः प्रतिगृह्यतां तत् ।
कृत्वा कृपां हे जगदेकनाथ,
चित्तोषितं रक्ष ममाभिमानम् ॥ ३ ॥

ततो यदीदं मम गीतजातं
पूजाक्षणान्ते स्खलितं समन्तात् ।
लयं धरण्या रजसि,प्रयाति
तदा क्षतिर्मे भविता न कापि ॥ ४ ॥

कियद्धनं ते कर-युग्मकोषे
भवत्यजस्रं लुठितं समन्तात्
कियद्धनं वा भवति प्रनष्टं ।
तदेव सर्वं श्वसिते ममैव
स्फुटं त्वरां सन्नयते प्रकामं
प्राणान् मदीयान् चिरसार्थकत्वम् ॥ ५ ॥

(९८)

व्यावर्त्य वक्त्रं सततं प्रति त्वां
स्थास्यामि तावत् सविधे तवेति ।
एकं मदीयं मनसोऽभिलाषं
कृत्वा कृपां हे सफलं कुरुष्व ॥ १ ॥

स्थितिं पुरस्तान्मुखदर्शनं ते
वाञ्छामि हे केवलमत्र लोके ।
सर्व-व्यथा-काङ्क्षित-कर्ममध्ये
काम्या च मच्चित्तविलग्नतैका ॥ २ ॥

धावन्ति वाञ्छा द्विविधाः समन्तात् ।
तासां ममैकां सफलीकुरुष्व ॥ ३ ॥

वाञ्छा हि सा मे प्रतिरात्रमेव
जागर्तु विश्वैकजनार्तिमध्ये ।
तथैकसूत्रेण दिनानि नाम
वध्नातु गीतेऽद्वितये सहर्षे ॥ ४ ॥

(६६)

आकाशमाच्छाद्य पयोदजालै-
राषाढ़मासः पुनरागतो मे ।
तेनैव सार्धं पवनाधिरूढ़-
मायाति वृष्टेरपि सौरभं वै ॥ १ ॥

नवाम्बुदानां घनिमानमद्य
दृष्ट्वा पुराणं हृदयं ममैतत् ।
प्रध्वानमाप्ता पुलकोद्गमेन
दोलायमानं भवतीह भूयः ॥ २ ॥

क्षेत्रे विराटे नवशष्पराशौ
छाया क्षणान्ता पततीह वृष्टेः ।
'वृष्टिः समेता' वदतीति चित्तं
'वृष्टिः समेता' चरतीति गीतम् ॥ ३ ॥

समागता सा मम नेत्रयुग्मे
समागता सा हृदि धावमाना ।
आकाशमाच्छाद्य पयोदजालै-
राषाढ़मासः पुनरागतो मे ॥ ४ ॥

(१००)

वर्षर्तुरूपं ह्यवलोकयामि
नृणां समाजे प्रतिरूपितं हे।
प्रगाढ़सज्जापरिभूषिताङ्गः
स याति गर्जन्नभितोऽद्य विश्वम्। [सः = वर्षर्तु]
तस्यान्तरे नृत्यति कापि भीमा—
निहन्ति सीमामत एव धावन्॥ १॥

किताड़नाचालितयो-र्नभोऽन्ते
पयोदयोः सङ्गतयो र्न जाने
वत्से च वत्से ध्वनतीह वज्रः।
वर्षर्तु रूपं किल चाद्य वीक्षे
नृणां समाजे प्रतिरूपितं हे॥ २॥

दूरं सुदूरं प्रति धावमानाः
पुञ्जै र्विभक्ता जलदा प्रयान्ति।
यानं किमर्थं न तु ते विदन्ति;
विदुर्न कस्मिन् वितले गभीरे
नभस्य-मासे सुदृढ़प्ररूढ़े
जले गलन्तः पतितार एव।
जानन्ति नो तद्घनडम्बरे वै
कौ जीवमृत्यु लसतश्च भीमौ।
वर्षर्तु रूपं ह्यवलोकयामि
नृणां समाजे प्रतिरूपितं हे॥ ३॥

ईशानकोणे झटिकास्तथामू-
रन्योऽन्य-कर्णे गुरुमन्द्रनादैः
कां नाम वार्तां कथयन्त्यजस्रं ;
दिगन्तराले भवितव्यता का
स्तब्धान्धकारे वितते समन्ताद्
भाषाविहीनां वहते व्यथां च ;
अनातपस्य निविड़स्य निम्ने
कस्मिन् हि कार्ये सविधं प्रपन्ने
घनायते मेऽसितकल्पना च ।
वर्षंतुं रूपं ह्यवलोकयामि
नृणां समाजे प्रतिरूपितं हे ॥ ४ ॥

(१०१)

देहं मनो मे परिपूर्य, देव
कां त्वं सुधामिच्छसि पातुमद्य ॥ १ ॥

कवे, मदक्ष्णा स्वकविश्वचित्रं
द्रष्टुं वतास्ते हृदि कामना ते ।
निर्वाक् स्वयं सन् श्रवणेन मेऽपि
श्रोतुं स्वगीतं ननु वाञ्छसि त्वम् ॥ २ ॥

मदीय-चित्ते तव विश्वसृष्टि-
रेकां च वाणीं रचयत्यपूर्वाम् ।
प्रीतिस्तया ते सह वै मिलित्वा
मद्गीतिजातं कुरुते प्रवुद्धम् ॥ ३ ॥

कृत्वात्मदानं मयि पश्यसि त्वं
माधुर्यसिक्तं स्वकमेव रूपम् ।
देहं मनो मे परिपूर्य, देव,
कां त्वं सुधामिच्छसि पातुमद्य ॥ ४ ॥

(१०२)

ममैष कामः,—श्वसितेऽत्र हर्षो
गीतौ महत्यां ध्वनतु त्वदीयः ॥ १ ॥

क्षुद्रं मम द्वारमवेक्ष्य गेहे,
प्रभो, त्वदीयं गगनं विशालम् ।
आलोकधाराश्च तथा ह्युदारा
न जातु तस्माद् विमुखा हि यान्तु ॥ २ ॥

षण्णामृतूणां निचयो हि नित्य-
नवीनसज्जापरिभूषिताङ्गः ।
सुरम्य-नृत्यैः सहजैः समेतु
पर्यायमालम्ब्य ममान्तरे च ॥ ३ ॥

(१०३)

एकोऽद्वितीयो वहिरागतोऽहं
तवाभिसारे हृतचित्तवृत्तिः ।
शब्देन हीने तमसि प्रगाढे
मया तु सार्धं चलतीव को वा ॥ १ ॥

तं हातुमिच्छामि वहुप्रकारे-
दूरं सरन्, वक्र पथेन गच्छन् ।
मन्ये विपन्मे ह्यधुनापयाता,
वीक्षे तु तं वै पुनरेव पश्चात् ॥ २ ॥

प्रकम्प्य पृथ्वीमयते जनोऽसौ
तस्यास्थिरत्वं विषमं वतेदृक् ।
सर्वस्य लोके वचनस्य मध्ये
स वाञ्छति स्वं वचनं प्रवक्तुम् ॥ ३ ॥

सोऽहं स्वयं, नाथ, न कश्चिदन्यो,
न जातु लज्जा भुवि तस्य कापि ।
आदाय तं, नाथ, कथं प्रयामि
त्वद्द्वारदेशं त्रपया कया वै ॥ ४ ॥

(१०४)

स्थितोऽस्मि युष्मान् प्रति वद्धदृष्टिः
स्थानं प्रदध्वं सकलस्य मध्ये ।
निम्नेऽतिनिम्ने क्षितिधूलिराशौ
न यत्र देयासनशुल्कमुद्रा,
न यत्र रेखाङ्कितभाग आस्ते,
मानेऽवमाने च न यत्र भेदो
तत्रैव भो भो भुवनेऽत्र मह्यं
स्थानं प्रदध्वं सकलस्य मध्ये ॥ १ ॥

यत्रास्ति वाह्यावरणं न किञ्चि-
न्नग्नो नृणां संस्तव एव यत्र ।
यत्र 'स्वकीयो विभवो न दभ्रः'
स्वं यत्र नो गूहति सत्यमेतत्,
तत्र स्थितोऽहं गत-सर्वलज्जो
दानेन नूनं परमेण तस्य
करोमि पूर्णं मम दैन्यजातम् ।
स्थानं प्रदध्वं सकलस्य मध्ये ॥ २ ॥

(१०५)

अतः परं नो निजमस्तकेन
वक्ष्यामि भूयो मम 'मत्ता'-भारम् ।
द्वारे स्वकीये धृतभिक्षुवृत्तिः
स्थास्यामि नो वा पुनरत्र लोके ॥ १ ॥

भारं वतैतं तव पादमूले
क्षिप्त्वा प्रयास्यामि वहिः सलीलम् ।
वार्तां ग्रहीष्यामि न काञ्चिदस्य
न चापि काञ्चित् कथयामि वाचम् ॥ २ ॥

मद्वासना यत् स्पृशतीह वस्तु
यमेव लोकं ह्यथवात्र लोके ।
द्रव्यं हितद्वै जन एव वा स
निर्वापयत्यात्मविभां निमेषात् ॥ ३ ॥

अपूतहस्तद्वयकेन तेन
यदाहृतं तन् नहि कामयेऽहम् ।
प्रेम्ना तवाहो ध्वनितं न यत् स्यात्
कदापि नाहं किल तत् सहिष्ये ॥ ४ ॥

(१०६)

(१)

चित्तात्र मे ! जागृहि पुण्यतीर्थ
शनैररे भारतवर्षभूमे-
रस्मिन् महामानवसिन्धुतीरे ।
स्थित्वात्र वाहुद्वयमुन्नमय्य
नमः प्रकुर्वे नरदेवतायै ।
उदारवृत्तग्रथितैर्वचोभि-
स्तामेव वन्दे परया मुदा च ।
एतेऽद्रयो गाढ़समाधिमग्ना
ये नाम केचिदिह दृश्यमाना (:),
धृत्वैव हस्ते सरिदक्षमालां
स्थिताश्च ये प्रान्तरभूमिभागाः,
पश्यात्र नित्यं धरणीं पवित्रा-
मस्मिन् महामानवसिन्धुतीरे ॥

(२)

आमन्त्रणेनात्र जनस्य कस्य
कुतो हि देशान्न हि वेत्ति कोऽपि
दुर्वारकुल्या प्लवमानदेहा

समेत्य नित्यं कति लोकधारा
जाता विलीनाः पुनरेव सिन्धौ।
आर्या अनार्या इह नाम सर्वे
पाठानसङ्घा इह मोगलाश्च
शकास्तथा द्राविड़-चीन-हूना
इहैकदेहे प्रलयं प्रयाताः।
दिक् पश्चिमा द्वारमपुद्धदद्य
फलेन तस्या दिश एव सर्वे
समानयन्ति ह्युपहारजातम्।
तेषां च दान ग्रहणे भवेतां,
सम्मेलिता स्ते मिलितास्तथा स्यु-
रस्मिन् महामानवसिन्धुतीरे॥

(३)

रणार्थिनो ये जयगीतिशब्दै
रुन्माद कोलाहलमुद्गिरन्तो
भित्त्वा मरुं पर्वतमापगाश्च
समागतास्ते मम देहमध्ये
राजन्ति नित्यं, न गता हि दूरम्।
ममैव रक्ते नितरां ध्वनन्ति
स्वरा विचित्राः सततं हि तस्य।
हे रुद्र-वीणे ध्वनिता भव त्वं—
गच्छन्तु नाशं प्रतिबन्धका ये।
अद्यापि दूरे घृणया स्थिता य
आयान्तु सर्वे परिमुक्त-बन्धा-
स्तेऽस्मिन महामानवसिन्धुतीरे।

(४)

एकस्य मन्त्रे हृदयस्य तन्त्र्यां
कदाचिदत्र ध्वनितः किलाभू-
दोङ्कारनादः सुमहानबाधम् ।
एकाग्निमध्ये तपसा ह्यनेकं
हुत्वा, विराट् हृदयं त एकं
विस्मृत्य भेदं रचयाम्बभूवुः ।
तत् साधनाराधनयज्ञशाला-
द्वारं विमुक्तं ननु विद्यतेऽद्य ।
सर्वैरुपेत्यानतमस्तकेन
सौभ्रात्रभावात् खलु मेलितव्य-
मस्मिन् महामानवसिन्धुतीरे ।

(५)

होमानले तत्र निपश्यताद्य
ज्वलन्ति दुःखस्य शिखाः सुरक्ताः ।
तदेव दुःखं सहनीयमेव
मर्माणि दाह्यान्यपि नः प्रकामं
भाग्ये यतो नो लिखितं किलैतत् ।
हे मन्मनो ! दुःखमिदं वहस्व,
समाह्वयं तं शृणु चैककस्य ;
लज्जां जया हो, जय भीतिजातं,
दूरेऽपयान्तु प्रसृतावमानाः ।
गतेऽवसानं व्यथिते दुरन्ते
प्राणो विशालस्तत एव जन्यः ।
रात्रिः प्रभाता, जननी विनिद्रा

जागर्ति नीड़े विपुले तु नित्य-
मस्मिन् महामानवसिन्धुतीरे ।

(६)

आर्या ! अनार्या ! इह वै समेत,
समेत सर्वे धृतहिन्दुधर्माः,
समेत-मोहम्मदधर्मवन्तः ।
खृष्टानसंज्ञाः सकलाः समेत,
सर्वे तथाङ्गलाः समुपेत चाद्य ।
समेत विप्रा ! कृतचित्तशोचाः
गृह्णीत हस्ते सकलस्य हस्तम् ।
समेत्य भो भोः पतिताश्च सर्वे
दूरं कुरुध्वं ह्यपमानभारम् ।
अस्मज्जनन्या अभिषेक-कार्ये
समेत सर्वे द्रुतया च गत्या ।
संस्पर्शपूतैः सकलस्य पश्य
शुभो घटस्तीर्थजलैर्न पूर्णः ।
एताद्य भो भारतपुण्यभूमे-
रस्मिम् महामानवसिन्धुतीरे ॥

(१०७)

(१)

सर्वाधमो यत्र विराजते हे
दीनेषु दीनोऽपि तथा च यत्र,
विराजते तत्र पदद्वयं ते
सर्वस्य पश्चात् सकलस्य निम्ने
सर्वस्वरिक्तस्य जनस्य मध्ये ।

(२)

नमाम्यहं, नाथ, यदा भवन्तं
क्वापि प्रणामो स्थगतीव मे सः,
यदापमानप्रचयस्य निम्ने
त्वत्पादपद्मं वतरत्यजस्रं
तदा नतिर्मे न भवेद् वतीर्णा
सर्वस्य पश्चात् सकलस्य निम्ने
मध्ये जनानां हृतसर्वकानाम् ।

(३)

दरिद्रवेशं परिधाय यत्र
भूषाविहीनो भ्रमसीह, नाथ,
स्पर्शं तवाप्नोति न मे हि गर्वं
सर्वस्य पश्चात् सकलस्य निम्ने
मध्ये जनानां हृतसर्वकानाम् ।

(४)

यत्रार्थमानौ मम नाम पूर्णौ
तत्रैव सङ्गं तव कामयेऽहम्।
भूत्वा सहायो ह्यसहाय-गेहे
यत्र स्थितस्त्वं न तु तत्र चित्तं
ममावतीर्णं भवति प्रकामं
सर्वस्य पश्चात् सकलस्य निम्ने
मध्ये जनानां हृतसर्वकानाम्।

(१०८)

हे मे परं दुर्भग देश। येषां
कृतं त्वया वै ह्यपमान जातम्।
लब्ध्वापमानं सह तैश्च सर्वै-
स्त्वयापि लभ्या समरूपता हे ॥ १ ॥

मनुष्यजातेः सहजाधिकारात्
प्रवञ्चिता ये सुचिरं त्वया हे।
पुरःस्थितान् यान् मनसावमत्य
स्थानं निजाङ्के न कदापि दत्तं,
लब्ध्वापमानं सह तैश्च सर्वै-
स्त्वयापि लभ्या समरूपता हे ॥ २ ॥

स्पर्शं मनुष्यस्य निरुध्य नित्यं
स्वप्राणदेवं प्रति ह्यपराद्धम् ।
विधातृरोषादतिरुद्रमूर्तें-
र्दुर्भिक्षरक्षः प्रतिहारमित्वा
विभज्य सर्वैः सह पान-भोज्ये
सेव्ये त्वया वै नतमस्तकेन ।
लब्ध्वापमानं सह तैश्च सर्वे-
स्त्वयापि लभ्या समरूपता हे ॥ ३ ॥

क्षिप्तास्त्वया यत्र निजासनात् ते
नूनं न जानास्यवहेलया त्वं
निर्वासिता तत्र निजैव शक्तिः ।
ते पादपिष्टा विलुठन्ति धूलौ-
तत्रैव निम्ने भव हेऽवतीर्णो
नोचेन्न रक्षा तव चान्यतोऽस्ति ।
लब्ध्वापमानं सह तैश्च सर्वे-
स्त्वयापि लभ्या समरूपता हे ॥ ४ ॥

त्वमद्य निम्ने क्षिपसे जनं य-
मधोनिबद्धं स विधास्यते त्वाम् ।
तथा च पश्चान्ननु यं न्यधत्था
आकर्षति त्वां सततं स पश्चात् ।
अज्ञानतारूपतमोऽन्तराले
यमावृतं त्वं विदधासि चाद्य
स मङ्गलं तेऽपि पिधाय घोरं
प्राचीरमेकं रचयिष्यतेऽन्तः ।
लब्ध्वापमानं सह तैश्च सर्वे-
स्त्वयापि लभ्या समरूपता हे ॥ ५ ॥

शतं शताब्दीस्तव मस्तके हे
पश्यावतीर्णो ह्यपमानभारः ।
न त्वं प्रणामं कुरुषे तथापि ।
विचित्ररूपाण्यभितो नराणाम् ।
तथापि नेत्रे विनते विधाय
मोहान्ध ! भो भो न हि वीक्षसे किं
सन्त्यत्र हीनाः पतिता हि ये वा ?
धूलौवतीर्णो भगवान् स तेषाम् ।
लब्ध्वापमानं सह तैश्च सर्वै-
स्त्वयापि लभ्या समरूपतात्र । ६ ॥

न वीक्षसे द्वारि कृतान्तदूत-
स्तिष्ठन्नमोघामभिशापवाणीं
तवाङ्कयज्जात्यभिमानभाले ।
सर्वान् न चेदाह्वयसि त्वमद्य
तेभ्यश्च दूरेण वितिष्ठसे चेत्,
स्वं चेन्निवध्नास्यभिमानरज्ज्वा,
मृत्योर्हि मध्ये चितिभस्मराशौ
लभ्या तदा तु समरूपता तैः ॥ ७ ॥

(१०६)

न मुञ्च तं रे, सुदृढं धरस्व
ध्रुवं जयस्ते भविताऽचिरं रे ।
मन्येऽन्धकारो गत एव दूरे
न कापि भीतिस्तव चास्ति भूयः ॥ १ ॥

प्राच्या दिशः पश्य ललाटपीठे
द्रुमान्तराले घनकाननानाम् ।
शुक्राख्य-तारा ह्युदिता हि रेऽसौ
भयं न किञ्चित् तव चास्ति भूयः ॥ २ ॥

निशाचरा वै खलु नाम चैते
स्वस्मिन् कुतः प्रत्यय एव तेषाम् ।
जाड्यं निराशाः शतसंशयाश्च—
नैते प्रभात-स्वजना हि जातु ॥ ३ ॥

आगच्छ धावन्, वहिरेहि रे रे,
पश्यायि पश्याम्वरमूर्ध्वशीर्षः ।
ज्योतिर्मयं तद् भवति क्रमेण
न कापि भीतिस्तव रेऽस्ति भूयः ॥ ४ ॥

(११०)

आस्ते प्रपूर्णं हृदयं ममाद्य
यथाभिलाषं क्रियतां त्वया वै ।
एकं सदा चेद् हृदि वर्तसे मे
सर्वाणि मे तद् हर हे वहिस्तः ॥ १ ॥

सर्वा पिपासा लयमेति यत्र
करोषि चित्तं यदि तत्र पूर्णम् ।
ततः परं हे मरु-मार्ग-मध्ये
प्रचण्ड सूर्यो यदि भाति भातु ॥ २ ॥

क्रीड़ां विधत्से कियताच्छलेन
हे नाथ तस्यां रमते मनो मे ।
यमेकतः प्लावयसेऽश्रुराशौ
तमन्यतः स्मेरमुखं विधत्से ॥ ३ ॥

मन्ये यदा मे निखिलं प्रनष्टं
गभीरभावेन तदाप्यते तत् ।
यदैव दूरे क्षिपसे निजाङ्कात्
तदैव भूयो निदधासि वत्से ॥ ४ ॥

(१११)

गृह्णामि गर्वेण न नाम तेऽदो
हे चित्तवेदिन्! ननु वेत्सि तद्धि ।
किं शोभते हे तव पूतनाम
ममेह वक्त्रे वद, देवदेव । १ ॥

यदात्र लोके सकलस्य हन्त
भवामि नाथ ! ह्युपहास-पात्रम् ।
चिन्ता तदैषा समुदेति चित्ते-
त्वन्नाम किं मे ध्वनतीह कण्ठे ॥ २ ॥

त्वत्तोऽवतिष्ठे वहुदूरतो य-
च्चित्तान्ममेदं न हि जातु यातु ।
त्वन्नामगीतिच्छलतो ददामि
स्वसंस्तवं चेत् त्रपया म्रियेऽन्तः ॥ ३ ॥

मिथ्याभिमानात् कृपयाभिरक्ष्य
स्थाने च योग्ये ननु मां निधेहि ।
मां सर्वदृष्टेः पथितोऽपसार्य
कुरुष्व मे त्वं नतनेत्रदानम् ॥ ४ ॥

मदर्चना तत्-करुणाप्तिहेतोः
साप्नोतु मानं न गृहेऽन्यदीये ।
त्वामाह्वयामि स्थित एव धूलौ
दुष्टोऽपवादैरपि नित्यनूत्नैः ॥ ५ ॥

(११२)

क आह सर्वं परिहाय गम्यं
मृत्युर्यदा त्वां हि करे ग्रहीता ।
समाहृतं यच्छ्वसिते त्वयात्र
तदेव नेयं मरणे गतेऽपि ॥ १ ॥ [गते = प्राप्ते]

भाण्डालयं पूर्णमिमं समेत्य
शून्योऽवसाने किमु यास्यसि त्वम् ।
नेयं यदास्ते भुविते स्वकीयं
गृहाण तत् तत् सकलं च सम्यक् ॥ २ ॥

योऽवस्करस्याचित एव भूयान्
भारो निरन्तं श्वसिते त्वया रे ।
त्राणं भवेत्ते यदि यानकाले
क्षयं विधायास्य गमिष्यसि त्वम् ॥ ३ ॥

समागता यद्वयमत्र लोके
सज्जा हि कार्या इह नाम सर्वाः।
हसंश्चलातो धृतराजवेश-
स्तत्रोत्सवे मरणस्य पारे ॥ ४ ॥

(११३)

गृहाण मे मानस! संगृहाण
स्व मर्ममध्ये प्रतिकर्षणेन।
आषाढ़-मासस्य नवागतस्य
प्रभातमेतन्नदीपार-यातम् ॥ १ ॥

विमिश्र्य नीलं हरितं च हैमं
या तेन कीर्णाऽमृत पुञ्जधारा।
गीर्या च खे जागरिता गभीरा
गृहाण रे मानस! तां गृहाण ॥ २ ॥

ततश्च तानि स्वकचेतनायां
निधेहि संग्रथ्य दिवा च नक्तम्।
भाग्योपनीतं दिनजातमेत-
न्मत्वा सयत्नं वृणु चित्त रे तत् ॥ ३ ॥

(११४)

दिवावसाने मरणं यदाहो
आयिष्यते ते प्रतिहारदेशम्।
तदा त्वयास्य प्रतिगम्य पार्श्वं
तस्मै प्रदेयं किमु नाम वित्तम् ॥ १ ॥

यत् पूर्णमास्ते हृदयं ममैतत्
तस्मै तदानीय पुरः प्रदास्ये ।
द्वारं यदा मे मरणं समेता
नामन्त्रयिष्ये खलु रिक्तहस्तम् ॥ २ ॥

क्षपा कियत्यः शरदो मधोश्च
प्रभातकालाः कति चापि सन्ध्याः ।
वर्षन्ति मे जीवनपात्रमध्ये
रसान् विचित्रान् कति नाम नित्यम् ॥ ३ ।

फलप्रसूनैः कतिभिस्तथा ते
कुर्वन्ति पूर्णं हृदयं मदीयम् ।
अर्कातपातातपमूर्तिकल्प—
सुखासुखस्पर्शसमर्पणेन ॥ ४ ॥

वित्तं हि किञ्चिन्मम सञ्चितं य-
दायोजनं च श्वसितस्य सर्वम् ।
दास्यामि तस्मै चरमेऽह्नि सज्जं
द्वारं यदा मे मरणं समेता ॥ ५ ॥

(११५)

निजाभिलाषात् सदयं स्वयं हे
क्षुद्रं च कृत्वा निजदेहमानं
क्षुद्रालयं मे समुपैषि, नाथ ।
त्वद्रूपमाधुर्यमतः सुधाभं
नेत्रक्षुधां मे शमयत्युदग्राम् ।
अनेकरूपं परिगृह्य तस्मा-
ज्जले स्थले त्वं विधृतोऽसि नित्यम् ॥ १ ॥

पिता च माता च सखा च भूत्वा
क्षुद्रश्च भूत्वा स्वयमेषि चित्ते ।
क्षुद्रं विधास्ये किमहं किलापि
तं विश्वनाथं निजपाणिनैव—
किं वेद्मि भोस्त्वामुत वेदयामि
क्षुद्रेण तेऽनेन हि संस्तवेन ? २ ॥

(११६)

समेहि मृत्यो ! मम नाम मृत्यो !
मदायुषोऽन्ते परिपूर्णते हे,
पार्श्वागतो मे कथयैकवाचम् ।
व्याप्यैव सर्वं श्वसितं मदीयं
वर्तें तदर्थं चिरजागरूकः ;
त्वदर्थमेकं च वहन् भ्रमामि
सुखासुखस्यैव तथा व्यथां च ।
समेहि मृत्यो ! मम नाम मृत्यो !
पार्श्वागतो मे कथयैकवाचम् ॥ १ ॥

लब्धं मया यद्, भुवि यत्र वृत्त-
माशा मदीया, प्रणयोऽपि सर्वः
धावत्यजानत् सकलं प्रति त्वाम् ।
त्वया मया स्यान्मिलनं भवेऽत्र
शुभैकपाते तव नाम दृष्टेः
मज्जीवरूपा भविता वधूटी
तवैव नित्यानुगता सहाया ।
समेहि मृत्यो ! मम नाम मृत्यो !
पार्श्वागतो मे कथयैकवाचम् ॥ २ ॥

चित्तेऽस्ति वद्धा वरणस्य माला-
वदाधुना मां हृदये ग्रहीतुं
तूष्णीं कदा हे स्मितफुल्लवक्त्रः
समेष्यसि त्वं वरवेशधारी।
स्थाता न किञ्चिद् भवनं तदा मे,
निजः परो वा न जनश्च कश्चित्।
तस्यां भवेद्वै विजनक्षपायां
पतिव्रतैका मिलितैव पत्या।
समेहि मृत्यो! मम नाम मृत्यो!
पार्श्वागतो मे कथयैकवाचम् ॥ ३ ॥

(११७)

यात्री हि रेऽहम्।
धृत्वा न मां शक्ष्यति रोद्धुमेकः।
सुखासुखस्यानृत एव वन्धः,
क्वेदं कृतं स्थास्यति सद्म-पश्चात्,
कर्षत्यधो मां विषयस्य भार-
श्छिन्नो भवन् स पतिता विकीर्णः ॥ १ ॥

यात्री हि रेऽहम्।
गायामि गच्छन् पथि चित्तपूरम्।
द्वार्देहदुर्गस्य भवेद् विमुक्ता
मद्वासनाया निगडोऽपि भिन्नः।
यास्यामि पारं सदसच्च तीर्त्वा
लोकाच्च लोकान्तरमेव धावन् ॥ २ ॥

यात्री हि रेऽहम् ।
भारोऽपयाता सकलो मदीयः ।
कस्यापि भाषारहिते नु गीते-
दूर प्रयाणे ह्वयते नभो माम् ।
सायं प्रभाते हरते मनो मे
स्वरैर्गभीरैर्मुरली च कस्य ॥ ३ ॥

यात्री हि रेऽहम् ।
कीदृक् प्रभाते निरगां न जाने ।
न क्वाप्यगायद् विहगस्तदैकः,
को वेद रात्रिः कियती च शिष्टा ।
एकाक्षि मे निर्निमिषं तथापि
जाग्रत् स्थितं वै तमसि प्रकामम् ॥ ४ ॥

यात्री हि रेऽहम् ।
कस्मिन् दिनान्ते समुपस्थितः स्यां
जाने न कस्मिन् भवनेऽन्तिमे मे ।
दीपायतेऽस्मिन् वद तारका का
किं पुष्पमाघ्राय विरौति वातः ।
अनादिकालः स्थित एव तत्र
स्निग्धाक्षियुग्मः प्रतिपालयन् माम् ॥ ५ ॥

(११८)

रथेऽभ्रभेदिध्वजमुन्नमय्य
वहिष्पथेऽमुत्र स वर्ततेऽसौ ।

आयाहि धावन् गुण-कर्षणाय— [गुण = रज्जु]
कुत्रालसस्तिष्ठसि गेहकोणे ।
उल्लम्फनै रे जनतां प्रविश्य
स्थानं स्वकीयं क्रियतां कथञ्चित् ॥ १ ॥

क्वाप्यस्ति किञ्चिद् यदि गेहकृत्यं
तदद्य यातु प्रलयं स्मृतेस्ते ।

आकर्षं दत्त्वात्र मनस्तनुं च
विहाय मायामपि भूतपिण्डे ।
कर्षं श्चलारे तमसि प्रभातौ
ग्रामे नगर्यां वनपर्वतेषु ॥ २ ॥

विघूर्णते चक्रमदः सशब्दं
शृणोषि किं वक्षसि शब्दमेतम् ?

मृत्युञ्जयं गीतिचयं विगायद्
दोलायते किं हृदयं न रक्ते ।
वन्येव वाञ्छा किमु वेगशीला
महायतीं वा प्रति धावते न ॥ ३ ॥

(११९)

आराधना-साधन-भक्ति-पूजा-
स्तिष्ठन्तु सर्वाः पतिता हि भूमौ ।
घनान्धकारे सुरमन्दिरस्य
कोणैकदेशेऽसि कथं निषण्णः ॥ १ ॥

तमोऽवलुप्तो मनसा स्वकेन
कमर्चसि त्वं वद रे सुगुप्तम् ।
उन्मील्य नेत्रे सकृदत्र पश्य—
कुत्रापि कक्षे न हि देवतास्ति ॥ २ ॥

गता हि सा तत्र, भुवं विदार्य
कृषीवलो यत्र कृषिं विधत्ते ।
भित्त्वाश्मपिण्डं श्रमिकाश्च यत्र
निर्मान्ति मार्गान् सकलं हि वर्षम् ॥ ३ ॥

वृष्टौ च रौद्रे सह सास्ति सर्वै-
र्हस्तौ च तस्या रजसा विलिप्तौ ।
विहाय शुद्धं वसनं च सेव
समेहि रे त्वं रजसां निकाये ॥ ४ ॥

मुक्तिः ? क्व लभ्या वद सा त्वया रे
क्व नाम मुक्तिर्भुवि विद्यतेऽत्र ?
प्रभुः स्वयं स्वीकृत-सृष्टि-वन्धः
सर्वैः समं तिष्ठति रेऽत्र वद्धः ॥ ५ ॥

ध्यानं तवास्तां, कुसुमार्घ्यमस्तु,
छिनत्तु वस्त्रं, मलिनोऽस्तु हस्तः ।
लब्ध्वैकतां तेन च कर्मयोगात्
चरन्तु घर्मास्तव भूतले च ॥ ६ ॥

(१२०)

सीमान्तरे त्वं हि भवस्यसीमः
स्वकं स्वरं वादयसे ततो हे ।
ममान्तरे नाथ तव प्रकाश
एतादृशं तन्मधुरातिशायी ॥ १ ॥ [तत्=तस्मात्]

गन्धे च वर्णे च विचित्ररूपे
छन्दोऽनुबन्धे च सुगीतिकायाम् ।
अरूप ! चित्रा तव रूपलीला
प्रबोधयत्येव मनःपुरं मे ॥
एतादृशं हे मधुरा नितान्तं
ममान्तरस्था तव नाम शोभा ॥ २ ॥

त्वया मया हे मिलने च जाते
द्वारं हि सर्वं भवतीह मुक्तम् ।
विश्वाम्बुधिर्वीचिविचित्रलीलां
तदा प्रदर्श्यालभतेऽस्थिरत्वम् ॥ ३ ॥

छायाविहीना तव नाम भाति-
र्ममान्तरे सा लभते यि कायाम् ।
मदीय-चक्षुर्गलदम्बुधारे—
सा जायतेऽतो विधुरा मनोज्ञा ॥
एतादृशं हे मधुरा नितान्तं
मदन्तरस्था तव नाम शोभा ॥ ४ ॥

(१२१)

ततः प्रभो हे मयि ते प्रमोद-
स्ततस्त्वयाधो भुवनेऽवतीर्णम् ।
मिथ्याऽभविष्यद्, यदि नाऽभविष्यं,
प्रेम त्वदीयं, त्रिजगत्पते हे ॥ १ ॥

आदाय मां ते भुवनोत्सवो हे
रसस्य खेला वहतेऽत्र चित्ते ।
इच्छा त्वदीया धृतचित्ररूपा
वीचीयते मे श्वसिताब्धिमध्ये ॥ २ ॥

राजाधिराजोऽपि तत स्त्वमेव
निरन्तरं भ्राम्यसि मे हृदोऽर्थे ।
विचित्ररूपं परिगृह्य, नाथ,
सदासि चित्ते मम जागरूकः ॥ ३ ॥

ततोऽवतीर्णोह तवानुरक्तिः
प्रेम्न्येव भक्तस्य हृदिस्थिते हे ।
विभाति पूर्णं तव नाम मूर्ति-
युग्मस्य मेलं समवाप्य तत्र ॥ ४ ॥

(१२२)

मानासनं मे, सुखदा च शय्या
त्वदाश्रये नैव कदापि, नाथ ।
विहाय सर्वं परितृप्तिमाप्त्वा
मार्गं वहिःस्थं भज मे मनो रे ॥ १ ॥

सर्वे सखायः, समया समेत
प्रयात यूयं सकलाः समेताः।
अमानितानां भवनेऽद्य यात्रा
विधास्यतेऽस्माभिरितश्च सर्वैः ॥ २ ॥

विधाय भूषां सकलापवादं
धास्यामि तं कण्टक-कण्ठहारम्।
तथा कराभ्यां स्वयमुन्नमय्य
रक्षामि भूयेऽन्यपमानभारम् ॥ ३ ॥

यत्रान्तिमं सद्म सुदुर्गतानां
विलोक्य तस्मिन् रजसि स्वमस्तम्।
मत्त्यागपात्रं परिशून्यगर्भं
कुर्वे* पुरानन्दरसेन पूर्णम् ॥ ४ ॥

[पराकुर्वे – करिष्यामि]

(१२३)

यदा प्रभोः सद्म न ऐत, वीराः
क्वासीत् सुगुप्तं विपुलं बलं वः।
क्व चास्त वर्म, क्व च शस्त्रमस्त्रम्?
उपायहीनाः परमं च दीनाः
क्षीणा दरिद्रा अपि चास्त यूयम्।
आघातजातं परिवेषःजाता-
न्निरन्तरं वै समुपस्थितं वो
यदा प्रभोः सद्म न ऐत, वीराः ॥ १ ॥

प्रत्यागतास्तस्य गृहं यदास्त
लुप्तं क्व वीराः, विपुलं बलं तत् ?
धनुःशरासि स्खलितं गतं क्व ?
विकाशितोऽभूद्र वत शान्तिहासः ।
विहाय कृत्स्न-श्वसितस्य सर्वं
फलं च यूयं सुचिरं प्रयाताः—
प्रत्यागता आस्त यदा हि भूयो
हे वीरसङ्घा, प्रभु-सद्मयमध्यम् ॥ २ ॥

(१२४)

अभावयं यद्र भवितव्यतान्ते ।
यात्राऽभवन्मे स्थगिता चिराय ।
न मार्गशेषो, न च कार्यशेषः
पाथेयशेषश्च न विद्यतेऽद्य ।
गम्यं मया कच्चर-दीर्णवेशै-
र्निःशब्दजीर्णश्वसितान्तरालम् ॥ १ ॥

किमद्य पश्यामि समन्ततो मे
केयं हि लीला विपुला निरन्ता ।
कीदृग् ह्यपूर्वं वहते नवत्वं
नदीव चान्तःसलिला समन्तात् !
पुराणभाषा मृतिमाप वक्त्रो
यदा तदेकं ध्वनितं बभूव
नवीनगानं मम वत्समध्ये ।
प्रत्नश्च मार्गो गतवान् समाप्ति
यत्रैव तत्रानय एव मां त्वं
नवीनदेशं सदयं प्रकामम् ॥ २ ॥

(१२५)

गीतं ममेतद् व्यसृजत् स्वकीय-
मलङ्कृतीनां प्रचयं प्रकामम् ।
तथा सकाशे तव नाप्यरक्षत्
स्ववेश-सज्जोद्भवदभ्रगर्वम् ॥ १ ॥

स्वालङ्कृतिस्त्वां व्यवधाय, नाथ,
प्रबाधते नो मिलनं यथार्थम् ।
तस्या हि झङ्काररवः सुमिष्ट
आच्छादयत्येव कथां त्वदीयाम् ॥ २ ॥

न शोभते ते सविधे च, नाथ,
स्तोकं मदीयं कविनामगर्वम् ।
महाकवे हे, तव पादपद्मे
वाञ्छामि वन्दी भवितुं धृतः सन् ॥ ३ ॥

आदाय मज्जीवनवस्तु यत्नै-
र्निर्मामि वंशीं सरलां यदीह ।
स्वरैः स्वकीयैः कुरु, देवदेव,
सर्वं च रन्ध्रं परिपूर्णमस्याः ॥ ४ ॥

(१२६)

निन्दापवादैरपमानजातै-
राघातमाप्नोमि कियन्तमत्र ।
तथापि जाने न हि तत्र दभ्रा
कस्यापि नाशस्य ममास्ति शङ्का ॥ १ ॥

यदा वितिष्ठे रजसां निकाये
तदासनार्थी न हि भावनास्ति ।
दैन्यस्य मध्ये स्थित एव याचे
निःसङ्कोचं ते सततं प्रसादम् ॥ २ ॥

यदा जनो यच्छति साधुवादं
यदा च सौख्येन वसामि लोके ।
जानामि चित्ते वहुवञ्चनानि
तस्यैव मध्ये स्थितिमाचरन्ति ॥ ३ ॥

सुसज्जवेशैः प्रविभूष्य तानि
समन्ततो मूर्ध्नि वहन् भ्रमामि ।
गच्छाम्यहं यत् तव सन्निधानं
नेदङ् ममास्ते समयोऽपि कश्चित् ॥ ४ ॥

(१२७)

भूपालवेशैर्मणिरत्नहारै-
स्त्वमादराद् भूषयसे शिशुं यम् ।
क्रीड़ा-प्रमादौ भवतोऽस्य लुप्तौ,
वासांसि भूषा विषमश्च भारः ॥ १ ॥

आघातदीर्णं रजसाङ्कितं वा
भवेदिदं चेदिति शङ्कयैव ।
स्वं चापसार्य क्रमणाच्च विभ्यद्
वितिष्ठते वै सकलात् स दूरे ॥ २ ।

भूपालवेशैर्मणिरत्नहारै-
स्त्वमादराद् भूषयसे शिशुं यम् ।

नृपालवेशैर्मणिरत्नहारैः
किमीदृशैः स्यान्मम नाम, मातः ।
द्वारं न रुन्ध्याः—पथि यामि धावन्
रौद्रेऽनिले कर्दमतो रजःसु ॥ ३ ॥

यत्रास्ति मेलो भुवि मानवानां
यत्रास्ति खेला विविधाह्नि नक्तम् ।
यत्रास्ति गीतिः स्वरमण्डिता च
पदं न तस्मिन् लभते स जातु ।

नृपालवेशैर्मणिरत्नहारै-
स्त्वमादराद् भूषयसे शिशुं यम् ॥ ४ ॥

(१२८)

स्थूलैक तन्त्री सह सूक्ष्मतन्त्र्या
श्लिष्टा विजाता जटिलत्वमाप्त्वा ।
अतो न वीणा मम जीवनस्य
स्वरैर्यथार्थैर्ध्वनतीह भूयः ॥ १ ॥

तद्विस्वराणां जटिलत्वहेतोः
प्राणव्यथं हा म्रियते च हृन्मे ।
पुनः पुनर्मे सहसा च गीतं
प्रभ्रष्टतानं लभते विरामम् ॥ २ ॥

इमां हि वोढ़ुं मम मर्मपीड़ां
हे नाथ, दभ्रा मम नास्ति शक्तिः ।
सभापथे ते समुपस्थितः सन् ।
नितान्त-लज्जामधिगम्य दूये ॥ ३ ॥

ये वै गुणाढ्यास्तव नाम सन्ति
तेषां समीपे न निषत्तुमीशे ।
द्वारे हि तिष्ठामि गृहस्य वाह्ये
सर्वस्य पश्चादत एव, नाथ ॥

सा रे न वीणा मम जीवरूपा
स्वरैर्यथार्थैर्ध्वनतीह भूयः ॥ ४ ॥

(१२६)

प्रशस्तगानं न हि गीतमासीत्
प्रशस्तदानं न च दत्तमास्त ।
मन्येऽस्ति सर्वं मम चावशिष्टं
कृतं प्रति त्वां ननु वञ्चनं हे ।
—कदा भवेन्मे श्वसितं प्रपूर्य
पूजावसानं मम जीवनस्य ? १ ॥

अन्यं च सर्वं यति नाम सेवे
ददे च पूजार्घ्यमशेषशक्त्या,
मन्येत दीनं यदि मां हि कश्चि-
दितीव भीत्या कियदेव सज्ज-
मृतानृतं तत्र करोमि नित्यम् ।

गुप्तं न किञ्चित् सविधे हि तेऽस्ति
त्वदर्चने साहसमीदृशं तत् ।
नयामि पादं मम सर्ववित्त-
मुन्मुक्तमेतद् हृदयं दरिद्रम् ॥ २ ॥

(१३०)

ममान्तरे ते भविता हि लीला—
भवे ततोऽस्मिन्नहमागतोऽस्मि ॥
द्वारं च सर्वं भुवनेऽत्र मुक्तं,
गर्वं च सर्वं भवितापयातम् ।
आनन्दरूपेऽत्र भवे तवास्मिन् ।
किमप्यलभ्यं भविता न शिष्टम् ॥ १ ॥

त्यक्त्वा मयासून् यदि जीवितव्यं
ममान्तरे ते भविता हि लीला ।
लयं गताः स्युर्ममसर्वकामाः
प्रीत्यैकया ते मिलिता भवन्तः ।
सुखासुखेऽत्र श्वसिते विचित्रे
स्थाता न वै कोऽप्यपरो विना त्वाम् ॥ २ ॥

(१३१)

दुःस्वप्न एकः कुत आगतः सन्
मज्जीवनस्याकृत पर्युदासम् ।
क्रन्दंस्ततो जागरितो निरीक्षे
क्रोडं जनन्या, न च किञ्चिदन्यत् ॥ १ ॥

अभावयं, सा ननु कश्चिदन्यः,
तस्मादयुध्येऽसुपणेन भीत्या।
हासं ततो वीक्ष्य मुखे त्वदीये
वुद्धं मया, दोलमदा हि मे त्वम् ॥ २ ॥

सुखासुखत्रासवशं गतं सद्
धुनोति मां जीवनमेतदेव।
तदन्तरेणास्ति न किञ्चिदन्यत्
तन्मे हि सर्वं द्रविणं किलेव ॥ ३ ॥

इदं तमोऽद्यणोः प्रलयं प्रयाता* [लुट्]
प्रभातदीप्त्या निमिषेण नाम।
पुरस्तदा से परिपूर्णमूर्तेः
सर्वंस्तरङ्गो विरतिं च याता ॥ ४ ॥

(१३२)

चित्ताद् वहिस्त्वां विचिनोमि, नाथ,
गीतेन नित्य श्वसिते मदीये।
गृहं गृहं द्वारपदं कियच्च
गीतं मदीयं ननु नीतवन्माम्।
गीतेन कृत्वा च करावमर्शं
भ्रमामि नित्यं भुवने त्वदीये ॥ १ ॥

अशिक्षयत् तत् कति मां हि शिक्षा (:)
अदर्शयन्मे कति गुप्त मार्गान्।
हृदम्बरे वै कति नाम तारा
व्यधत्त नित्यं मम वोधगम्याः ॥ २ ॥

देशे हि नाना-सुखदुःखपूर्णे
रहस्य-लोके च निरन्तरालम् ।
मां भ्रामयित्वा दिवसावसाने
कस्मिन् गहे हन्त समानयत् तत् ॥ ३ ॥

(१३३)

अन्तं गतेऽपि श्वसिते मदीये
न स्यात् समाप्तिर्विचितेर्हिते मे ।

यास्याम्यहं वै नवजीवलोकं
नवा च दृष्टिर्मम नेत्रमेता । [एता—लुट्]
भूत्वा नवीनो नव भातिमध्ये
नूत्नं च वन्धं मिलनस्य धास्ये ॥

—न स्यात् समाप्तिर्विचितेर्हिते मे ॥ १ ॥

नास्ते समाप्तिस्तव नाम, नाथ,
पुनः पुनस्तत् तव नूत्नलीला ।
न वेद्मि वेशेन पुनश्च केन
सुस्मेरवक्त्रः पथि राजितासि [लुट्]
हस्तं च धर्तासि समेत्य पार्श्वम् ।
लग्नो हृदि स्यान्नवभावरागः ।

—न स्यात् समाप्तिर्विचितेर्हिते मे ॥ २ ॥

(१३४)

गीतेऽन्तिमे मेऽखिलरागपूर्णे
स्वरैर्ममानन्दचयोऽस्तु युक्तः।
लब्ध्वा यमानन्दमतिप्रसन्ना
वृक्षेषु शष्पेषु लतासु नित्यं
मृत्सास्वरूपा हसति क्षमा सा,
लब्ध्वा यमानन्दमिव प्रमत्तौ
तौ जीवमृत्यू भ्रमतोऽत्र लोके ;
स वै ममानन्दचयः प्रकामं
सङ्गच्छतां तत्स्वरजालकेन ॥ १ ॥

प्रवातमूर्ति प्रतिगृह्य योऽय-
मानन्द एवात्र समेत्य सुप्तं
प्रबोधयत्यन्तरमट्टहासैः ;
आनन्द एवाक्षिजले सदा यो
दुःखव्यथाकोकनदे स्थितोऽस्ति ;
विसृज्य धूलौ द्रविणं च सर्वं
आनन्दने यत्र न विद्यते वाक् ;
स वै ममानन्दचयः प्रकामं
सङ्गच्छतां तत्स्वरजालकेन ॥ २ ॥

(१३५)

बध्नासि मां, नाथ, यदाग्रपश्चा-
न्मुक्तिर्न मे स्यादिति भावयामि।
क्षिपस्यधो मां हि यदेति मन्ये
समुत्थितः स्यां न हि जातु भूयः ॥ १ ॥

मां वन्धमुक्तं कुरुषे स्वयं त्व-
मुत्थापयस्येवमहो पुनर्माम् ।
मां वाहुदोलामधिरोप्य चैवं
ददासि कम्पं चिरजीवनं मे ॥ २ ॥

मां भीषयित्वा कुरुषे वितन्द्रं
तदा प्रवोध्यैव भयं भनक्ति ।
आहूय चित्ते च निजं प्रकाश्य
निलीयसे हन्त तदैव कुत्र ।
चिराय नष्टोऽसि यदैव मन्ये
कुतोऽपि मां वेदयसे स्वसत्ताम् ॥ ३ ॥

(१३६)

स्थातासि यावच्छिशुवद् ह्यशक्ति-
स्तावद् हृदन्तःपुर एव तिष्ठ ॥ १ ॥

अत्यल्पघातात् पतितासि घूर्ण-
न्नत्यल्पदाहाद् भवितासि दग्धः ।
अत्यल्पधूलि-प्रविलिप्तकायो
भविष्यसि त्वं मलिनो हि यावत्
तावद् हृदन्तःपुर एव तिष्ठ ॥ २ ॥

यदा त्वदीया भविता हि शक्ति-
र्यदा च पूर्णं भविता हि चित्तम् ।
तदा सुधां तस्य कृशानुगर्भां
स्व कण्ठपुरं खलु पास्यसि त्वम् ॥ ३ ॥

यासि तदा त्वं वहिरेव धावन्
स्थातासि पूतो रजसापि लिप्तः ।
वद्धोऽपि गात्रेऽखिलवन्धनैस्त्वं
स्वाधीनवृत्तिर्विचरिष्यसीह ।
तिष्ठान्तःपुर एव तावत् ॥ ४ ॥

(१३७)

चित्तं मदीयं त्वयि नाम नित्यं
तथा च सत्यं भवेदेव, नाथ—
स्यात्, सत्य भो, मे सुदिनं कदैवम् ? १ ॥

सत्यं जपन्नित्यमनेकवारान्
सत्ये च वुद्धिं प्रणिधाय सर्वां
सीमातिवन्धं समतीत्य यामि
हे नाथ, नूनं भुवने समस्ते ।
हे सत्य, पूर्णं भवतः प्रकाशं
द्रक्ष्यामि नित्यं श्वसिते कदा मे ॥ २ ॥

सत्यं सदा त्वामपसार्य दूरे
म्रिये ह्यसत्ये सततं स्वकीये ।
न वेद्मि, कुर्वे किमु, कान्त, तस्मिन्
सदा विमूढः किल भूतराज्ये ।
धौता विशुद्धा मम नाम सत्ता
भवेददृश्या त्वयि नाथ कामम् ।
प्राप्स्यामि ते चेदिह सत्यरूपं
हे सत्य, सत्यं ननु जीवितास्मि ।
मध्ये तवातो मरणं मदीयं
कदा स्वमृत्युं वद लप्स्यते वै ॥ ३ ॥

(१३८)

रक्षाम्यहं त्वां प्रभुमेव कृत्वा
शिष्टास्त्वहंता मम केवला सा।
पश्यामहं त्वां सकलासु दिक्षु,
समर्प्य सर्वं त्वयि चास्मि लीनो,
दिवानिशं प्रेम ददामि तुभ्यं,
सदैषणा सैव वशिष्यतां मे—
रक्षाम्यहं त्वां प्रभुमेव कृत्वा ॥ १ ॥

त्वां क्वाप्यहं नावृणुयां यथात्र
सदैषणा सैव वशिष्यतां मे।
लीला भवेत्ते परिपूर्य चित्तं
भवेऽत्र तस्माद्धृत—रक्षितोऽस्मि।
स्थास्यामि वद्ध स्तव वाहुदाम्ना ;
स एव वन्धो ननु शिष्यतां मे—
रक्षाम्यहं त्वां प्रभुमेव कृत्वा ॥ २ ॥

(१३९)

मच्चित्तपूरं यददा हि मह्यं
खेदः कुतो यद्यधुना म्रियेऽहम्।

दिवानिशं सर्वसुखासुखेषु
कति स्वरा दध्वनुरत्र वत्से ;
विचित्रवेशेन विचित्ररूपः
कक्षं प्रविश्याहर एव चित्तम्।
खेदः कुतो यद्यधुना म्रियेऽहम् ॥ १ ॥

जाने, न चित्ते वृतवानहं त्वां,
न पूर्णमाप्तं सकलं मयात्र ।
भाग्यं तु मन्ये ह्यलभेऽत्र यद् वे-
स्पर्शोऽलभे ते यत एव तत्र ।
त्वं वर्तसे यद् विदितं ममैतद्—
धृत्वा तदाशातरणीं प्रयामि
खेदः कुतो यद्यधुना म्रियेऽहम् ॥ २ ॥

(१४०)

रे कर्णधारिन्नयि रे मदीय,
रे कर्णधारिन् नरजन्मतर्याः ।
शक्नोषि किं त्वं सुविदूरतोऽपि
श्रोतुं ध्वनन्तीं परपारवंशीम् ॥ १ ॥

दिवावसाने तव सा तरी रे
घट्टे विलग्ना भविताधुना किम् ।
सन्ध्यान्धकारे किमु तत्र रे रे
दीपावली दर्शनमातनोति ॥ ३ ॥

एका कथा मे स्फुरतीव चित्ते-
सुमन्दमिष्टे पवनेऽत्र कस्य ।
हासः पयोधेः परपारतोऽद्य
भित्त्वान्धकारं समुपैति नाम ॥ ३ ॥

आयानकाले कुसुमानि यानि
समाहृतान्येव, ततो नवानि ।
संगृह्य तूर्णं नय रेऽधुना त्वं
सज्जानि कृत्वा निज पुष्पपात्रे ॥ ४ ॥

(१४१)

छाया सुकृष्णां—स्वमनस्तनुं च
वाञ्छामि नेतुं विलयं चिराय ।
वह्नावमुष्मिन् प्रसभं विदग्धुं
मग्नं विधातुं जलधावमुष्मि-
न्नङ्घ्रावमुत्र द्रवतां च नेतुं
मायास्वरूपं दलितुं तथा च
मनो मदीयं, मम तां तनुं च ॥ १ ॥

गच्छामि देशं यमिमां निरीक्ष्य
व्याप्यासनं तत्र सुसन्निविष्टां-
स्त्रिये ह्रियाहं—वलतोऽपहृत्य-
च्छायामिमां हे निविडां गृहाण
मनो मदीयं, मम तां तनु च ॥ २ ॥

ममानुभावे न हि कापि बाधा—
लभ्या त्वया क्वापि भवेऽत्र, नाथ ।
विद्राव्य मायां मम दृष्टि मार्गं—
मनो मदीयं, मम तां तनुं च ॥ ३ ॥

(१४२)

प्रयाणकाले भुवनादितोऽहं
वाचं ममैतां समुदीर्य यायाम् ।
दृष्टं च लब्धं च मया यदेव
न विद्यते तस्य तुला हि कापि ॥ १ ॥

ज्योतिः-समुद्रेऽत्र विकाशमाप्तं
विराजते यच्छतपत्रपद्मम् ।
मया निपीतं मधु नाम तस्य
धन्यस्ततोऽहं सपदि प्रजातः ॥
प्रयाणकाले वचनं ममैतद्
विज्ञाप्य सर्वान् विगतिर्ममास्तु ॥ २ ॥

क्रीड़ागृहे तस्य च विश्वमूर्तें-
रकार्षमस्मिन् कति नाम खेलाः ।
उन्मील्य नेत्रद्वयमत्र लोके
व्यलोकयं त ह्यपरूपमूर्तिम् ॥ ३ ॥

स्प्रष्टुं न यं कोऽपि भवेत् समर्थः
सर्वात्मना वन्दिरभूत् स्वयं सः ।
अत्रैव नाशो यदि तस्य काम्यः
करोतु वै तं मम स प्रकामम् ॥
प्रयाणकाले वचनं ममैतद् ।
विज्ञाप्य सर्वान् विगतिर्ममास्तु ॥ ४ ॥

(१४३)

यं स्वेन नाम्नापिदधामि लोके
स नाम-काराभुवि मृत्युमेति ॥ १ ॥

विस्मृत्य सर्वाणि तदेव नाम
ग्रथ्नामि यावद्ध्रियति ह्यमुष्मिन् ।
स्व नामगर्वेण विनाशयामि
सत्यस्वरूपं निजमेव तावत् ॥ २ ॥

सञ्चित्य पांशूपरि पांशुराशिं
करोमि तन्नाम समुच्छ्रितं वै ।
छिद्रं भवेच्चेत् क्वचनात्र राशौ
जानाति चित्तं विरतिं न काञ्चित् ।
करोमि यत्नान् यतिं नाम नाम्नि
निजस्वरूपं ततिं नाशयामि ॥ ३ ॥

(१४४)

नाम्नो यदा मे विदधासि लोपं
जीवामि नाथ प्रतिपद्य मुक्ति—
स्वप्नाद्विमुक्तः स्वकृतादलीकात्
तवैव मध्ये नवजन्म लब्ध्वा ॥ १ ॥

आच्छाद्य तावत् तव हस्तलेखां
रेखां स्वनाम्नो विलिखामि तत्र ।
कियन्त्यहानि श्वसितस्य यायु-
र्वहन्ति भीमां विपदं वदैवम् ॥ २ ॥

हृत्वान्यभूषामभिकाङ्क्षतीदं [इदं — स्वनाम्]
निजं वपुर्भूषयितुं तया च ।
आच्छाद्य सर्वस्वरमन्यदीयं
तद् वष्टि हा वादयितुं स्वमेकम् ॥ ३ ॥

मन्नाम चैतद् विलयं प्रयातु
सुखेन गृह्णामि तवैव नाम ।
तदा हि सर्वैर्मम सङ्गमः स्याद्
विनापि नाम्नो भुवि संस्तवं मे ॥ ४ ॥

(१४५)

बाधाभिरावेष्टित एव वर्तं
वाञ्छामि गन्तुं परिहृत्य ताश्च ।
त्यक्तुं तु ता एव यदोद्यतोऽस्मि
वज्रेण वक्षो भवतीव दीर्णम् ।
मुक्त्यर्थंनाये सविधं यदैमि
नितान्त-लज्जार्दति मानसं मे ।
श्रेष्ठस्त्वमेव, श्वसिते मतो मे
धनं ममेदङ् न समस्त्वयास्ति ।
तथापि गेहे मम भग्नचूर्णं
यदस्ति, हातुं न हि तत् समर्थः ॥ १ ॥

रजोनिकायो भवतः प्रकाश-
माच्छाद्य चित्तं च समावृणोति ।
पुनः पुनश्चापि स मृत्युजातं
समानयत्येव भवे ममापि ।

सर्वात्मना तं प्रति मेऽस्त्यवज्ञा
तथापि तस्मिन् प्रणयोऽचलो मे।
अपूर्णतास्ति प्रतिकार्यमध्ये
वैफल्य-गुप्ती, कति वञ्चनानि।
अतो हितं प्रार्थयितुं यदैमि
महाभयं मे समुदेति चित्ते ॥ २ ॥

(१४६)

जानामि नो यद्यपि याचितुं हे
दयां त्वदीयां, करुणावतार।
तथापि कृष्ट्वा सदयं नयस्व
स्वमङ्घ्रि-पद्मं शरणं ममैकम् ॥ १ ॥

निर्माय यद् वै हृतचित्तवृत्तिः
स्वाच्छन्द्यमध्ये निवसामि नित्यं,
यत्रस्थितो वा फलपत्रपुष्पै-
रुपासनं चापि सुखस्य कुर्वे,
क्रीडागृहे तत्र रजःस्वरूपे
निधेहि मा मां ह्यवधीरयित्वा।
आहत्य दीप्तानल-शल्यमेकं
प्रबोधय त्वं कृपया तु मां हे ॥ २ ॥

द्वन्द्वस्य मध्ये हि यदेव सत्यं
विराजते मुद्रित पुष्पकल्पम्।
त्वामन्तरेणापर एव को वा
जानाति तत् स्फोटयितुं समग्रम्।

विभिद्य मृत्योर्दशनं करालं
पीयूषधारा क्षरतीह नित्यम्।
तेन प्रपूर्णं भवति प्रकामं
शून्यं हि गर्भं किल दीनतायाः॥
मध्ये व्यथायाः पतनस्य काले
चैतन्यमागत्य सदा जागर्ति।
विरोधकोलाहलमध्य एव
गभीर-वाणी-ध्वनितास्ति तेऽपि॥ ३॥

(१४७)

या या हि पूजा श्वसिते ममास्मिन्
मर्त्येऽत्र लोके न समाप्तिमाप्ता।
जाने हि जाने सकला ममैता-
स्तव प्रसादाद् विफला न जाताः॥ १॥

यदेव पुष्पं स्फुटतामगत्वा—
दुर्दैवयोगात् क्षरितं धरण्याम्।
स्रोतस्वती या मरुमार्गमध्ये
बभूव सद्यो हृतवारिधारा
जाने हि जाने सकलं च तद्वै
तव प्रसादाद् विफलं न जातम्॥ २॥

अद्यापि पृष्ठे श्वसिते यदस्ति
जाने हि जाने तदभून्न मिथ्या।

अनागतं यद्, यदनाहतं मे
त्वद्वीणिकाया ध्वनतीह तन्त्र्याम् ॥
जाने हि जाने द्वयमेव तच्च
तव प्रसादान्न चिराय नष्टम् ॥ ३ ॥

(१४८)

एकप्रणत्या प्रभ ! एकनत्या
सर्वा तनुर्मे पतताल्लुठन्ती
तदीय संसारपदेऽत्र, नाथ ॥ १ ॥

नभस्यमासे घनतामुपेते
नभोघनाल्या रसनम्रयेव ।
एकप्रणत्या, प्रभ, एकनत्या
मनः समस्तं पतितं ममास्तां
लोकस्य तेऽस्य प्रतिहारदेशे ॥ २ ॥

नानास्वरव्याकुलभावधारा
एकत्र संमिश्रा हृतात्मवृत्त्या ।
एकप्रणत्या, प्रभ, एकनत्या
गीतं समस्तं लभतां समाप्तिं
पयोधिमध्ये ह्यरवप्रचारे ॥ ३ ॥

हंसा यथा मानसमभ्ययन्ते
प्राणास्तथा मे दिवसं निशां च ।
एकप्रणत्या, प्रभ, एकनत्या
महामृतेः पारमभिप्रयान्तु ॥ ४ ॥

(१४९)

आभासमात्रे स्थितमेव यन्मे
जीवद्दशायां सुचिरं सुगुप्तम् ।
प्रभातभातौ स्फुटतामुपेत्य
यच्चापि लोके न गतं प्रकाशम् ।
प्रत्यन्त दाने मम जीवनस्य
प्रत्यन्त गाने मम जीवनस्य ।
तदेव देवाद्य ददामि तेऽहं
समानयंस्ते सविधं सयत्नम् ।
प्रभातभातौ स्फुटतामुपेत्य
यच्चापि लोके न गतं प्रकाशम् ॥ १ ॥

अन्त्यां दशां तच्च समानयन्ती
गिरां विभूति नं शशाक बन्धुम् ।
स्वरान् प्रदायापि सुमुक्तहस्तं
गीतं न तत् साधयितुं शशाक ।
कुत्रापि तुष्णीं निभृत-प्रदेशे
रूपेण नूत्नेन सुमोहनेन
नेत्रान्तराले निखिलस्य गुप्तं
समावृतं चापि, सखे, तदासीत् ।
प्रभातभातौ स्फुटतामुपेत्य
तदेव तस्मान्न गतं प्रकाशम् ॥ २ ॥

आदाय तद् वै भ्रमणं ह्यकुर्वि
देशान् विदेशान् कति नाम गत्वा ।
निर्माणभङ्गाः श्वसितेऽत्र ये ये
तच्चावलम्ब्य प्रसृता हि सर्वे ।

भावेषु सर्वेष्वखिले हि कार्ये
सर्वस्य मध्येऽपि वितिष्ठमानं
स्थितं प्रसुप्तौ शयनेऽपि शश्वद्
एकं व्रतस्थे नियतं तदेव ।
प्रभातभातौ स्फुटतामुपेत्य
तदेव तस्मान्न गतं प्रकाशम् ॥ ३ ॥

कालं कियन्तं कति नाम लोका-
स्तं प्राप्तुमाकाङ्क्षितवन्त एव ।
अप्राप्य तं तु प्रतियातवन्तो
द्वारं वहिःस्थं पुनरेव मोघम् ।
त्वया हि तेषां भविताववोधः—
परो न कश्चित् किल भोत्स्यते तत् ।
आशामिमां ते परिपोष्य तस्थुः
स्वकीयचेतोगगने विलीनाः ।
प्रभातभातौ स्फुटतामुपेत्य
तदेव लोके न गतं प्रकाशम् ॥ ४ ॥

(१५०)

त्वयास्ति नित्यो मम हा विरोधो
नातःपरं तं प्रभवामि सोढ़ुम् ।
दिने दिने वै कति सञ्चितानि
त्वदङ्घ्रिमूले मम हा ऋणानि ॥ १ ॥

सभावसाने सकला समेत्य
त्वां नाथ नत्वा विगताः पुनश्च ।
भ्रमामि वासो मलिनं पिधाय
गुप्तोऽन्यथा तिष्ठति नाभिमानः ॥ २ ॥

किं चित्तदुःखं वद वेदयामि
मनो हि यातं ननु मूकभावम् ।
वाचं न काञ्चित् सविधे त्वदीये
ब्रवीति तद्वै पुनरेव, देव ॥ ३ ॥

त्वं नाधुना तद्द विमुखं कुरुष्व
नयस्व तद्द भो अपमानपारम् ।
दत्त्वा पदं स्वे चरणारविन्दे
क्रीतं हि दासं कुरु तच्चिराय ॥ ४ ॥

(१५१)

प्रेम्णो हि हस्ते विधृतो यथा स्यां
तथा वितिष्ठे समयं प्रतीक्ष्य ।
भूयान् विलम्बो मम नाम जातः
प्रभूतदोषैरहमस्मि दोषी ॥ १ ॥

आयाति धर्तुं विधि-बन्धदाम्ना
यदा स, गच्छाम्यपसृत्य दूरे ।
प्राप्या तदर्थं मम या हि शास्ति-
र्गृह्णामि तां वै सहचित्ततोषम् ॥ २ ॥

निन्दन्ति सर्वे भुवि मां हि लोका
जानामि तां वै वितथां न निन्दाम् ।
सर्वां स्वनिन्दां शिरसीह धृत्वा
स्थास्यामि लोके सकलस्य निम्ने ॥ ३ ॥

गतावसानं मम सर्ववेला
मेला समाप्ता क्रयविक्रयानाम् ।
आह्वातुकामाः समुपागता ये
ते प्रत्यगच्छन् विमुखाः सरोषम् ॥ ४ ॥

प्रेम्णो हि हस्ते विधृतो यथा स्यां
तथा वितिष्ठे समयं प्रतीक्ष्य ॥

(१५२)

संसारभूमावपरे हि ये मां
समाद्रियन्ते प्रणयेन, नाथ ।
पाशेन ते मां सुदृढ़ेन वद्ध्वा
रक्षन्ति पार्श्वे सततं च धृत्वा ॥ १ ॥

प्रेमा यतस्ते सकलातिशायी
नवा हि रीतिस्तव नाम, नाथ ।
वध्नासि न त्वं, रहसि स्थितोऽसि
दासं निधत्से सततं च मुक्तम् ॥ २ ॥

स्मरामि नो तानिति शङ्कयाऽन्ये
नैकाकिनं मामिह संसहन्ते ।
दिनात् परं याति दिनं मदीयं
न दर्शनं ते समवैमि दभ्रम् ॥ ३ ॥

त्वामाह्वयामि स्वयमत्र नो वा
वर्ते स्वमिष्टं प्रति वानुरक्तः।
तुष्टि स्त्वदीया मम नाम तुष्टिं
प्रतीक्षमाना भुवि विद्यते हे ॥ ४ ॥

(१५३)

त्वत्प्रेमदूतः प्रहितः कदा स्यात्
द्वन्द्वैर्विमुक्तः सकलैस्तदा स्याम्।
अन्ये समायान्ति गृहं हि ये मे
प्रदर्श्य मां शासति भीति जातम् ॥ १ ॥

दुर्वारचित्तं तु वितिष्ठते मे
द्वाराणि रुद्ध्वा सततं गृहान्तः।
पराजयं स्वीकुरुते न जातु
निवर्तयत्येव परन्तु सर्वान् ॥ २ ॥

तस्मिन्नुपेते त्रटितार्गला द्वाः
स्याद्वै तथा मेऽखिलवन्ध मुक्तिः।
को मां तदा रुन्त्स्यति गेहमध्ये
तस्याह्वये मे प्रतिवाक् च देया ॥ ३ ॥

एकाक्यसौ वै समुपैति नित्यं
गले च धृत्वा शुचिपुष्पमाल्यम्।
आकृष्य मां तेन यदा स वन्धा
स्थाता तदा मे मन एव निर्वाक् ॥ ४ ॥

(१५४)

आनन्दखेलानिचये स्थितः सन्
नित्यं ममाक्ष्णोर्गलदश्रुमध्ये ।
अगापयस्त्वं कतिभिश्छलैर्मां
कियन्ति गीतानि भवे त्वदीये ॥ १ ॥

स्वीकृत्य वन्धं न धृतिं प्रदत्से
पलायसे पार्श्वगतोऽपि सद्यः ;
पूर्णं व्यथाभिर्विदधासि हन्त
पले पले त्वं मम नाथ चित्तम् ॥ २ ॥

सुसज्जितां त्वं विदधासि वीणां
गुणैः सुतीव्रैः कतिभिश्च नाथ ।
मज्जीवनं त्वं शतरन्ध्रपूर्णं
कृत्वा स्ववंशीं ध्वनयस्यशेषम् ॥ ३ ॥

मज्जीवनं चेत् स्वरलीलया ते
समाप्तिमायातमिहैव लोके ।
निधेहि मां तर्हि विधाय मूकं
पूते त्वदीये चरणारविन्दे ॥ ४ ॥

अगापयस्त्वं कतिभिश्छलै मां
मज्जीवने हे कियदेव गीतम् ।

(१५५)

मन्येऽत्र कुत्रापि गतः समाप्ति
मज्जीवने यः स्थित एव शेषः ।
आदेश एकः समुपैति मां तु
पुनः सभायास्तव नाम, नाथ ॥ १ ॥

नवीनगानैर्नवरागयुक्तै-
र्जागर्ति चित्तं नवतामुपेत्य ।
गच्छामि कुत्र स्वरमार्गतोऽहं
किं लक्ष्यमुद्दिश्य परं न जाने ॥ २ ॥

सायन्तन-स्वर्णविभाचयेन
तानस्य कृत्वा मिलनं यथेष्टम् ।
पौरव्यरागेन मया यदैव
समापितं गीतमदो मदीयम् ॥ ३ ॥

निशीथ-गम्भीरतर-स्वरेण
प्रपूर्यते मे श्वसितं पुनश्च ।
तदा, विचित्रं, न हि विद्यतेऽत्र
लेशोऽपि सुप्तेर्मम नेत्रयुग्मे ॥ ४ ॥

(१५६)

सान्तस्य मध्ये प्रसरत्यनन्त—
इयं कथा मे समुदेति चित्ते ।
अन्तेऽद्य गीतस्य मया गीतस्य
क्षणे क्षणे वै क्षणदीप्तिकल्पा ॥ १ ॥

मन्ये स्वरो मे विरतिं प्रयात-
स्तथाप्यसौ नेच्छति वै विरन्तुम् ।
अशब्दमध्ये ध्वनतीव वीणा
प्रयोजनेनापि विना मदीया ॥ २ ॥

आघातमाप्नोति यदा हि तन्त्री
स्वरेण चापि ध्वनति प्रकामम् ।
सर्वाधिकं तत्र यदेव गीतं
नितान्तदूरे तु वितिष्ठते तत् ॥ ३ ॥

संलापजाते विरतिं प्रयाते
तच्छान्तवीणां भजतेऽवतीर्यं ।
सन्ध्या यथा वै दिवसावसायं
गम्भीरनादैः श्रुयते रणन्ती ॥ ४ ॥

(१५७)

दिवावसानं यदि नाम जातं
कूजन्ति नो वै यदि ते नभोगाः,
क्लान्तः समीरो यदि नापि वाति,
तदाधुना मां निविड़ं नितान्तं
प्रच्छादय त्वं सदयं प्रभो हे,
यथा प्रगाढ़े तिमिरस्य निम्ने
समावृणोस्त्वं धरणीं सुगुप्तं,
समावृणोर्मुद्रितमक्षियुग्मं,
समावृणोस्त्वं कमलं निशायाः ॥ १ ॥

प्रायेण शून्यं भवतीह यस्य
पाथेयमल्पं पथिमध्यभागे,
परिस्फुटं वै क्षति-लक्ष्म यस्य
रजोनिकायैरपमानजातै-
र्वासांसि भूषा मलिनाश्च यस्य,
प्रायेण नष्टा बत यस्य शक्तिः,
क्षतव्यथां तस्य समावृणोतु
कारुण्यगाढं घनगोपनत्वम् ।
छित्त्वास्य लज्जां स्फुटितं कुरुष्व
तं वै नवोषां प्रति सङ्गमय्य
सिक्त्वान्धकारामृतवारिणा च ॥ २ ॥

समाप्तोऽहं ग्रन्थः

Phatiklal Das

(9. 6. 1894—27. 12. 1974)

A biographical sketch

Not to believe in God and things divine is the distinctive character of the modern 'progressive' mind. To such a mind it may appear strange that a boy might be cured of long standing ill-health by eating a small quantity of clay given by a sannyasin who took it from near a tulsi plant. And yet such an event did happen to the boy Phatiklal Das.

Born in 1894 at Jalpaiguri, where his father was an overseer in the local District Board, Phatiklal was one of a large family of nine. He received his early education at his paternal home at Chandernagore. Even at that early age there blossomed in him a taste for painting and modelling in clay the figure of Lord Krishna. He had a particular affection for the tulsi plant. He began learning French from the second year of his school life at College Dupleix (renamed Kanailal Vidyamandir) where the language was taught from the lower classes. But his acquaintance with Sanskrit began through the Nagri script which he learnt to read and write from a Bihari gentleman who worked in a local jute mill and lived in their house.

It was at Jalpaiguri where he was taken back by his father and admitted to the sixth class (now, class five) that he had his first acquaintance with Sanskrit which became his life-long passion. He read the Sanskrit grammar Mugdhabodh by himself, and often devised mnemonic rules to learn grammatical rules. He frequently employed this method in Mathematies which was his next love.

Even as a schoolboy he felt the urge to compose Sanskrit slokas. The products of his first efforts did not sound as slokas even to his own ears. He came across a book "Chandomanjari" which laid down rules for composing slokas. He ordered a copy of the book from Calcutta and began composing slokas. His three translation works,

"Rabindrakusumanjali", parts I & II, comprising Sanskrit translations of many famous poems by Tagore and "Gitanjali", Sanskrit translation of the work of Tagore of that name, are the finest fruits of a long life dedicated to Sanskrit.

Passing the Matriculation Examination in 1912 from the Jalpaiguri school, he joined the I. A. Class at Hooghly College. He passed the I. A. Examination of the Calcutta University in 1916 and occupied the eighteenth place among all successful students. From the same College he passed the B. A. Examination with Honours in Sanskrit in 1918. He then joined the M. A. Sanskrit Class of the University of Calcutta. Here he became very intimate with classmate Sri Kshitishchandra Chatterjee. This friendship lasted till the death of Sri Chatterjee in whose Sanshrit magazine "Manjusha" Phatiklal Das published many of his translation works. Sri Satkari Mukherjee, who later on became the Head of the Sanskrit Department of the University of Calcutta, also became a close friend of Sri Phatiklal Das.

When he was a student of the sixth year class, his mother had an attack of pleurisy which soon developed into tuberculosis. This disease which was almost always fatal in those days carried his mother away from this world—a shock which was unbearable to Phatiklal. He gave up his studies and, to calm his agitated soul, used to go out on a bicycle and wander aimlessly. On one such occasion he found a large building was being built to house the Chandernagore Pustakagar (Library). The construction work attracted him like a magnet and thus began his association with the library which he served faithfully till his death and in the premises of which he passed forty-six years of his life.

A few years after he had given up his studies, he was appointed teacher at College Dupleix. Thus began his formal career as teacher. But he was a born teacher. Right from the Pathsala stage he often used to act as teacher to

his classmates. One day his teacher in the primary class asked him his lesson, found him far ahead of the other students and asked him to take their classes. In his secondary school days, he once received some help in Algebra from one of his class mates. Only a few months later, their respective roles were reversed. Phatiklal Das dedicated his whole life to the teaching of Sanskrit and Mathematics. His work "Sanskrit Siksha Sahachar" is a unique book in Bengali to help students learn Sanskrit. Among his unpublished works are a Sanskrit translation of the Aesop's Fables and a book on Mathematical puzzles

The boy modeller of Krishna, the boy who loved to read the Ramayana, became, in the middle years of his life, an agnostic. But this was a temporary phase. The deep spirituality that pervaded his whole life came to full fruition in the sixth decade of his life. He began to pass his days in spiritual activities and retired prematurely from service to devote himself fully to the spiritual quest. In his seventies he began to suffer from cataract of both the eyes. It was during this period of semi-blindness that he composed most of the poems of Tagore that have just been published. When the cataract was operated upon, he had an attack of blood-clotting in one of his legs which had to be amputated. Thus in the last two years of his life he became severely handicapped physically. And yet till the last days of his life which came to an end as a result of two heart attacks in December, 1974, he prepared his own meal. This was the man the like of whom, in scholarship and greatness of character, is rare now a days. Though his name and fame did not extend far beyond his home town Chandernagore and a very limited circle of Sanskrit lovers, he was a Roman in his own right.

———

Many a scholar has rendered Rabindranath's verses in Sanskrit. But though comparison is odious I must observe that this is the best of all......Had the Poet been alive he would have derived unqualified delight. The author of the work under review will make Rabindranath's unique genius understandable by lovers of poetry, particularly those who do not know Bengali.

—Dr. Satkari Mukherjee M. A,, Ph. D.

শ্রীযুক্ত ফটিকলাল দাস মহাশয়ের কবিতাগুচ্ছ 'রবীন্দ্র-কুসুমাঞ্জলিঃ' প'ড়ে মুগ্ধ হয়েছি।...তাঁর শব্দচয়ন অতি চমৎকার, ছন্দের গতি সাবলীল......কোথাও কোথাও কালিদাসের ভাবা সূক্ষ্মভাবে প্রতিধ্বনিত হয়েছে।

আমি অন্যত্র রবীন্দ্রনাথের কবিতার সংস্কৃত অনুবাদের সঙ্গে পরিচিত আছি। কিন্তু প্রায়ই ভাষার আড়ষ্টতা ও ছন্দোজ্ঞানের অভাব বা ছন্দের প্রয়োজনীয়তা সম্পর্কে অবহেলা কর্ণজ্বর ও মনঃকষ্টের কারণ হয়েছে। কিন্তু শ্রীযুক্ত দাসের তাৎপর্যানুবাদ মনোজ্ঞ এবং ছন্দোঝঙ্কার ও মূলের রস সুন্দরভাবে পরিবেশন করেছে।

—ডঃ বীরেন্দ্রকুমার ভট্টাচার্য, এম এ., পি. আর. এস,
ডি. লিট, আই. এ. এস।